Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS:

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, Ph. D.

No. 83.

रसमञ्जरी ।

श्रीभानुभट्टप्रणीता

अनन्तपण्डितकृतव्यङ्ग्यार्थकौमुद्या

नागेशभट्टकृतप्रकाशेन च सहिता ।

RASAMANJARI

By

Bhânu Bhatta,

With the Commentaries

Vyangyârthakoumudî of Ananta Pandit

and Prakâsa of Nâgesa Bhatta.

EDITED BY

Râma Sâstri Tailanga,

PROFESSOR, GOVT. SANSKRIT COLLEGE, BENARES.

Fasciculus I.

BENARES.

Published by the Proprietors Messrs. Braj B. Das & Co.,

AND SOLD BY L. D. GUPTA,

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyavilas Press,

BENARES.

1904.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ व्यङ्ग्यार्थकौमुदी ।

श्रीगणेशाय नमः ।

सर्वे साधुजनाः सदा यतहृदः सत्संप्रदायादलं
यज्ज्ञानाय कणादगौतममतान्यालोच्य तत्त्वार्थदान् ।
वेदान्तान् परिशीलयन्ति रहसि स्वानन्दकन्दादरं
वन्दे तं जगदीश्वरं दयितया सानन्दमालिङ्गितम् ॥ १ ॥

कलितललितवंशीरन्ध्रसंधारणैक-
प्रवणवलयचञ्चत्पल्लवाभाङ्गुलीकम् ।
अभिनवजलजाक्षीवृन्दचन्द्राननश्री-
नियमितनयनान्तं गोपिकाकान्तमीडे ॥ २ ॥

मूले कल्पतरोरमन्दवलितग्रीवं गवालोकने
ब्रह्मेन्द्रादिलुठन्महार्घमुकुटस्पृष्टाङ्घ्रिपीठं वपुः ।
लीलालम्पटगोपबालकवलव्यग्राननं गोपिका-
सङ्केतस्वनसावधानहृदयं सञ्चिन्तये श्रीपतिम् ॥ ३ ॥

सकलसुरमहेशं तत्त्वविद्योपदेशं
करवलयितशेषं मोक्षलक्ष्मीनिवेशम् ।
धृतललितविशेषं कर्णभूषाऽहिशेषं
श्रितजटिलसुवेषं चिन्तये चिद्विशेषम् ॥ ४ ॥

पञ्चाशद्वर्णभेदैरपरिमिततरैरर्थजातैश्च युक्ता
नानालङ्काररम्या गणितगुणगणा साधुवृत्तैरुपेता ।
वाक्सृष्टिर्यत्प्रसादात्प्रसरति रसनोपान्तदेशे निमेषा-
न्नित्यं चित्ते ऽनुरक्ते वसतु मम सुखं भारती सा रसाढ्या॥५॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसीदासीमभूमीपततिपरिवृढोद्दण्डचण्डप्रताप-
ज्वालामालाकरालाऽनलशमनमहावारिवाहप्रवाहः ।
विद्वद्दानाम्बुधारारुचिरपरिचयोत्पादिताऽनल्पधर्म-
स्वःशाखी ख्यातकीर्तिःप्रमुदितहृदयःकाशिराजाभिधानः ६

यदीयनगरे परे वसति स स्वयं शङ्करः
समस्तजनपापजप्रबलतापसन्त्रासनः ।
तिरस्कृतभवोद्भवः प्रचुरमुक्तिमुक्ताफलः
प्रकृष्टविबुधालये सुरसरिद्रसाऽलंकृते ॥ ७ ॥

तद्वंशजो धनुरिवाऽभवदेकवीर-
स्तत्पार्थिवप्रकरकेलिविलासशाली ।
यो लक्षदः क्षितितले किल मार्गणानां
राजा प्रतापवररुद्रमनोजकान्तिः ॥ ८ ॥

येन श्रीवैरिवीरोद्भवरुचिरनदी निर्मिता शक्तिघातै-
स्तत्पर्यस्तैश्च मस्तैर्धृतचिकुरलसद्दीर्घशैवालजाला ।
दृप्यन्मातङ्गकुम्भस्थलबहलगलच्चारुमुक्ताकलाप-
प्रोद्यत्सत्सैकता ऽन्तःपततिगजघटाकोटिशुण्डादिनक्रा ॥९॥

अजनि ततो जनगीयमानकीर्ति-
र्मधुकरशाह इति प्रसिद्धनामा ।
जगति जनार्दनचिन्तनैकचित्तः
स्फुरदुरुसूर्यसहस्रकोटिधामा ॥ १० ॥

यत्कीर्त्या धवलीकृते त्रिभुवने जैवातृकं रोहिणी
शम्भुं पर्वतकन्यका स च निजं कैलासमुर्वीधरम् ।
विष्णुः क्षीरनिधिं स चापि वसुधां स्वीयं गजं सिन्धुजं
नाविन्दद्विबुधः सहस्रनयनो मुक्तां च विद्वद्वधूः ॥ ११ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्योद्यत्करवालकालपुरुषः प्रत्यर्थिसीमन्तिनी-
चक्षुःकज्जलतस्करोऽपि सुचिरं हस्ताऽवलम्बादभूत्।
तत्तद्वीरसमस्तपार्थिवपृथुप्रख्यातकीर्तेस्तथा
कोशस्यापि च भाजनं कलिमलप्रध्वंसिधाराम्भसः ॥१२॥

तस्मादभूत् श्रीवरवीरसिंह-
देवाऽभिधानः प्रभुतानिधानम्।
कलासु सर्वास्वपि पुण्यदासु
विशारदः शारदन्द्रकान्तः ॥ १३ ॥

यस्य स्फारविपक्षपक्षसुवधूवैधव्यदीक्षागुरुः
संग्रामाऽध्वरकर्ममर्मकुशलः प्रत्यर्थिपृथ्वीभुजाम्।
प्राणाऽनर्घ्यमणेर्मया ऽपहरणं नाकारि किं तु प्रभो-
र्भ्रूभङ्गेन तवेति दिव्यमभजत्कोशं सुखड्गः पुरः ॥ १४ ॥
प्रत्यर्थिक्षितिपालतिन्दुकवनं यस्य प्रतापानले
सर्वं सन्दहति स्फुलिङ्गनिवहैर्दग्धो वियन्मण्डपः।
पश्चाच्चोडुमिषाद्व्यधायि विधिना नीरन्ध्रताभाक् शनै-
स्तत्तत्कीर्तिपटाऽल्पखण्डनिचयैः स्वच्छोल्लसत्कान्तिभिः॥१५॥
ये कीर्तिं तुलयन्ति चन्द्रमहसा पीयूषसारेण वा
किं चैरावतदन्तिना सममहो यद्वीरसिंहप्रभोः।
मूढास्ते नियतं यया ऽजनि तथा तेषां तपःसागरः
सौधौघाम्बुविलङ्घितत्रिभुवनस्वच्छोल्लसद्रूपया ॥ १६ ॥
सद्वृन्दावनकेलिकौतुकमनाः सद्वंशमेकं करे
कुर्वाणः कमलेक्षणः कुवलयापीडैकपीडाकरः।
चञ्चत्साधुगतिप्रकर्षविलसत्पक्षिद्विजेन्द्राश्रयो
यो ऽभूत्केवलमेक एव कमलाकान्तः कलौ भूतले ॥ १७ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेकसौवर्णतुलादिदात्रा
बुधव्रजप्रीतिविशेषभाजा ।
भास्वान् विवस्वानपि येन राज्ञा
तुलां ययौ नैव तुलांशभोक्ता ॥ १८ ॥

ये ये संग्राममूर्मौ निशितशरवराघातसंत्यक्तजीवा-
स्ते सर्वे वैरिभूपाः सुरवरयुवतीकेलिमग्नाः सुखेन ।
स्वर्लोके संवसन्तीत्यनभिमतवचोजातकोपप्रकर्षो
यो वीरस्तत्र हन्तुं कृतसुकृतबलादभ्यगात्तान्सपत्नान् ॥१९॥
तदात्मजः साधुगुणैरुपेतः श्रीचन्द्रभानुः प्रथितः पृथिव्याम् ।
वर्वर्ति सर्वोपरि गीतकीर्तिः सदा मुदा ध्यानपरः परेशे ॥२०॥
यस्य श्रीक्षितिपालमौलिनृपतेर्दानाम्बुनोत्पादितः
स्वःशाखीति विभाव्यते बुधगणैस्तत्त्वार्थसंदर्शिभिः ।
या केनापि कदापि किञ्चिदपि वा नालम्भि सा बाल्यतो
नो चेदुत्कटदानरीतिरभवत् कस्मादमुष्मिंस्तरौ ॥ २१ ॥
तत्तद्याचकविन्दुवृन्दमधुरोदञ्चन्मिलिन्दोल्लस-
द्यदानाम्बुनिषेकभासुरतरे दृष्टो दिगन्तान्तरे ।
विङ्गागप्रकरस्रपातनुरयं मध्येम्बरं स्वान् करान्
कृत्वा यत्र ययौ स्थिरत्वमगमन्मित्रस्य भावं यथा ॥२२॥
यस्य श्रीक्षितिनायकस्य ललितं दानाद्यमे यद्वचः
क्वास्ते सर्वहिरण्यमित्युदभवत्तत्कालमेवाऽलघु ।
तापः प्राप हिरण्यरेतसि जनिं जाड्यं हिरण्याचले
स्वेदाम्भोपि हिरण्यगर्भवपुषि स्वापाय संत्रासतः ॥ २३ ॥
गाङ्गेयस्य शतानि यः प्रतिदिनं लीलावशाद्भूपति-
र्भिक्षुभ्यः प्रददाति वैरिशिरसा संग्रामभूमौ बलीन् ।
भूतेभ्यः किल यः प्रयच्छति कुतस्तस्यात्र साम्यं भजे-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्राङ्गेयस्य बलेश्च दानमहिमा विख्यातकीर्तेरपि ॥ २४ ॥
यल्लोकाः कामसाम्यं नृपकुलतिलके चन्द्रभानौ वदन्ति
तद्रूपज्ञा न मन्ये वपुषि ननु यतो यच्छरेणाशु विद्धः।
यस्तं स्रस्ताऽलकान्ताः प्रगलितवसनास्त्यक्तभूषाविशेषा
धावन्ति प्रेमबद्धाः सपदि सुरवरस्त्रैणसङ्घाः सरागाः ॥२५॥
यस्योद्यत्करवालकालभुजगे संग्रामदेशे मतिं
गन्तुं कुर्वति वीरवैरिवनितावेणीभुजङ्गीगणाः।
दुःखोद्रेकवशादशेषवनितामूर्द्धैकभूषाः समं
सस्नेहाः खलु मूर्च्छिता इव परं भूमौ पतन्ति द्रुतम् ॥ २६ ॥
भ्रमेण रहितः सदा न च कदापि मन्दादरः
समस्तविषयेषु यः किमपि नोपरक्तः कलौ।
अनेकतुरगाधिपः सकललोकतापापहः
कथं न खलु भानुतो भवति चन्द्रभानुः परः ॥ २७ ॥
यत्कीर्तिर्विमला समस्तजगति ख्याता जगन्निर्मलं
कर्तुं सन्नियमं चकार च तथा चन्द्राधिकं तत्क्षणात्।
प्रोद्यच्छ्यामकलाकलापमलिनं यद्वैरिवक्त्रं तथा
शक्ता नेत्रतिलज्जयैव नु गता पारं परं वारिधेः ॥ २८ ॥
विद्वद्भिः समुपाश्रिता मुनिगणव्रातैः पुराणैः पुरा
शाखाभिर्निगमद्रुमस्य रचिता विद्यातरिः सादरम्।
मग्नाप्यत्र दरिद्रताजलनिधौ सत्कर्णधाराधिक-
श्रीवीरोद्भवचन्द्रभानुविभुना येनाऽधुना तार्यते ॥ २९ ॥
व्यञ्जनामग्नचित्तेन गौतमीतीरवासिना।
श्रीत्र्यम्बकतनूजेन पण्डिताऽनन्तशर्मणा ॥ ३० ॥
रसिकश्रुतिभूषा ऽस्ति भुवि या रसमञ्जरी।
व्यङ्ग्यार्थकौमुदी व्याख्या तन्यते ऽस्याः कुतूहलात् ॥३१॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदरादपि कुर्वन्तु दुर्जना न कथं चन।
हेलया ऽपि च सन्तोत्र दृष्टिं कुर्वन्तु मत्कृतौ ॥ ३२ ॥
किं मे प्रार्थनया ऽथ वा यदि गुणः कश्चित्स्वसूक्तौ भवेद्
विद्वद्वृन्दमिदं तदा द्रुततरं तेनैव बद्धादरम्।
नो चेद्दीनदयालु दैन्यवचनैस्तच्छ्रोष्यते केवलं
चित्तं संमदमातनोति कृतिनः किं तावता स्वान्तरे ॥३३॥
सगुणापि हन्त विगुणा भवति खला स्याद्विचित्रवर्णा ऽपि।
आखुमुखादिव शाटी पदपरिपाटी कवेः कापि ॥ ३४ ॥
सदोषमपि निर्दोषं भवत्यग्रे विपश्चितः।
रामस्येवाऽर्जुनवपुः कवेश्च सरसं वचः ॥ ३५ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसमञ्जरी ।

श्रीसरस्वत्यै नमः ।

आत्मीयं चरणं दधाति पुरतो निम्नोन्नतायां भुवि
स्वीयेनैव करेण कर्षति तरोः पुष्पं श्रमाऽऽशङ्कया ।
तल्पे किं च मृगत्वचा विरचिते निद्राति भागैर्निजै-
रन्तःप्रेमभराऽलसां प्रियतमामङ्गे दधानो हरः॥१॥

विशिष्टशिष्टकर्त्तव्यतापरिप्राप्तं मङ्गलमनुषङ्गतो व्याख्यातृश्रोतृमङ्गलाय निबध्नाति । आत्मीयमित्यादिना ।

यः निम्नोन्नतायां भुवि उच्चावचप्रदेशेषु पुरतः अग्रतः ।

रसमञ्जरीप्रकाशः ।

श्रीगुरुभ्यो नमः ।

सामि नीलोत्पलश्यामं वपुर्यस्य विभाति च ।
यामिनीदयितद्योतमानः सो ऽस्तु शिवाय नः ॥ १ ॥
नागेशभट्टनामा शिवभट्टसुधीसुतो मुदे विदुषाम् ।
रसमञ्जरीप्रकाशं रचयामि मितैर्वचोभिरर्थघनम् ॥ २ ॥

श्रमाशङ्कयेति सर्वत्र करणत्वेनान्वेति । आद्यपादे मृदुतरप्रियापादकमलस्य तथाविधप्रदेशे प्रथमपातेन सा तरोरेव न तरूणाम् । पुष्पमेव न तु फलं पुष्पाणि वा । एकपुष्पावचयकृतोपि श्रमो मा ऽस्त्विति भावेन प्रेमातिशयः । पुष्पावचयश्च तद्भूषणार्थः । तत्स्पृहणीये तस्यां ग्रहीतुं प्रवृत्तायां स्वयमेवाऽवकृष्य ददातीति भावः । तृतीये पादे कामिन्याः कोमलाङ्गतया ऽऽशङ्का । अन्तर्विद्यमानप्रेम्णा रसेनाऽऽस्वादेनाऽलसाम् । अनेन नायिकाया अप्यनुरागो दर्शितः । अन्तःप्रेमरसालस इति पाठे ऽन्तः प्रेमरसालसो ऽप्येवं चकारेति प्रेमाऽतिशयध्वनिः ॥ १ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यात्पुरः पुरतो ऽग्रत इत्यमरः । पुरसित्यव्ययस्य पुरस्त इति रूपं न तु पुरत इति । यच्च पिपर्तेर्घञर्थे कविधानमिति कप्रत्यये तदन्तात्तसिल् इति दुर्घटवृत्तिकृत्समाधानं तदपि प्रकृतार्थाऽसिद्धिकृदिति 'इयं च ते ऽन्या पुरतो विडम्बने'त्यादिमहाकविप्रयोगाद्यथातथा ऽस्य गतिश्चिन्तनीया । आत्मीयमेव आत्मनो ऽयमात्मीयः । वृद्धाच्छ इति छः । स्वीयमेव अर्थाद्दक्षिणमेवेत्यर्थः । न तु वामम् । आत्मीयपदेन वल्लभत्वं द्योत्यते । चरणं पादम् । एकवचनेनाऽतिवल्लभत्वे ऽप्युच्चावचप्रदेशेषु दानादधिकं प्रेम प्रियाविषयकमिति व्यज्यते । श्रमाऽऽशङ्कया श्रमस्य खेदस्य आ ईषत् शङ्का वितर्कः तया । एवं च प्रियाश्रमे यत्संशयवशादेवमकरोत् किं पुनस्तत्क्रमनिर्णये इति भावः । प्राणप्रियाया इति शेषः । प्राणप्रियायाः श्रमाशङ्कया इति चाप्यग्रे ऽप्यन्वेति । दधाति निक्षिपति । प्राणप्रियायाश्चाऽतिमृदुलचरणसरोजस्य तथाविधप्रदेशेषु प्रथमविन्यासेन श्रमो मा भवत्विति धियेति भावः । किं च यः स्वीयेनैव करेण दक्षिणकरेणैव तरोः न तु तरूणां पुष्पं न तु फलादि तदप्येकं न बहूनि कर्षति गृह्णाति । एवं चैकपुष्पस्यावचयेप्येतस्याः श्रमो मा भवत्विति धिया तथा ऽकरोदिति प्रियाप्रेमाऽतिशयो द्योतते । किं च अन्यदपि मृगत्वचा एणाजिनेन विरचिते विशेषेण उच्चावचशून्यतया रचिते सज्जिते तल्पे शयनीये । तल्पं च शयनीये स्यादिति विश्वः । निजैरेव दक्षिणैरित्यर्थः । भागैः एकदेशैः । एवं च सर्वं शयनीयमभिव्याप्य कोमलाङ्ग्याः कामिन्यास्तदेकदेशेपि यथा नाऽङ्गसन्बन्धः किं तु स्वशरीरोपर्येव यथा ऽङ्गसम्बन्धस्तथा ऽकरोतीति भावः । व्यङ्ग्यं पूर्ववदेवम् । निद्राति स्वपिति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं च स्वापेऽपि परिवर्तनाऽभावात्प्रेम्णि स्थिरत्वमावेद्यते । नन्वेतावता हरस्यैव प्रियाविषयकं प्रेम न तद्विषयं तस्या इत्यत आह अन्तःप्रेमभरालसामिति । अन्तः अभ्यन्तरे प्रेम अर्थाद्धरविषयकं, तेन अलसां तत्तद्व्यापाराऽयोग्याम् । अन्तःपदेन पुष्पाऽवचयादिकर्त्तव्यतारूपबाह्यप्रेमकार्याऽभावो द्योत्यते । एवं च प्रेम्णि परस्परनिरूपितत्वं ध्वन्यते । प्रियतमाम् अतिशयेन प्रिया इति प्रियतमा ताम् । अतिशयश्च प्रागुक्तरीत्या अनुसन्धेयः । यद्यपि हरस्य प्रियान्तराभावेनाऽवधारणफलकतमबूवैयर्थ्यं तथापि प्रियाशब्दस्य संबन्धिशब्दत्वेन येषां याः प्रियास्तासां मध्ये इयं प्रियतमेत्युक्ते तदितरदम्पत्यनुगतप्रियत्वाऽपेक्षयैतस्या असाधारणं प्रियत्वमिति न तद्वैयर्थ्यम् । अङ्गे शरीराऽर्द्धभागे । नपुंसकलिङ्गेन कठिनत्वाऽभावो व्यज्यते । एकवचनेन बहुकालमेकाङ्गएव धारणेऽपि श्रमाऽज्ञानात् प्रियाविषयकप्रेमनिमग्नमानसत्वं हरस्य व्यज्यते । दधानः सन् वहन् । हेतुगर्भमिदं विशेषणम् । स हरः जयतीत्यस्याऽध्याहारः । एवं च हरस्य सर्वोत्कृष्टताशालित्वप्रतिपादनेन स्वस्य सर्वान्तर्गतत्वेन तन्निरूपिताऽपकृष्टत्वप्रतीत्या मानसप्रणतिरूपं मङ्गलमावेदितं भवति ।

अत्र प्रियतमासाधारणस्य हेतोश्चरणत्रयपदार्थत्वेन काव्यलिङ्गमलङ्कारः । तदुक्तं "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृत"मिति । नायकश्चाऽयमनुकूलः । तल्लक्षणं तु सार्वकालिकपराङ्गनापराङ्मुखत्वे सति सर्वकालनिजाऽङ्गनाऽनुरक्तत्वम् । अत्र प्रथममवर्णदानात्संपत्फलकत्वम् । तदुक्तं भामहेन । "अवर्णात्संपत्तिर्भवती"ति । मगणपददानादपि तदेव फलं भवति । "मो भूमिस्त्रिगुरुः श्रियं ददाती"ति वृद्धवचनात् । इदं च फलं काव्यनायकस्य तत्कर्तुस्तत्पठितुर्वा यथासम्भवं व्यस्तं समु-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्वत्कुलमनोभृङ्गरसव्यासङ्गहेतवे ।
एषा प्रकाश्यते श्रीमद्भानुना रसमञ्जरी ॥ २ ॥

चितं वा ज्ञेयम् । यत्र तु नायकः प्राचीनो देवतादिर्वा स्वकल्पितो वा तत्र तत्कर्तुस्तत्पठितुर्वेति विवेकः । शार्दूलविक्रीडितं वृत्तम् ।

कर्णः कुण्डलसङ्गतः करतलं चामीकरेणाऽन्वितं
पादान्तो नवनूपुरेण कलितो हारौ प्रसूनोज्ज्वलौ ।
गुर्वानन्दयुतो गुरुर्यदि भवेत्तन्न्यूनविंशाक्षरं
नागाधीश्वरपिङ्गलेन भणितं शार्दूलविक्रीडितम् ॥
इति तल्लक्षणात् ॥ १ ॥

श्रोतृप्रवृत्तये प्रयोजनं दर्शयन् स्वकीर्त्यनुवृत्तये स्वनामग्रन्थनामनी प्रतिजानीते विद्वत्कुलेत्यादिना । विदुषां विपश्चितां न तु मूर्खाणाम् । तथा च तैरेतद्ग्रन्थाऽनादरेपि न क्षतिरिति भावः । कुलं गणे, सजातीयगणे गोत्रे देहेपि कलितं कुलमिति विश्वः । तस्य यन्मनः । मन इत्येकवचनेन सर्वविद्वन्मनसामेकजातीयव्यसनशालित्वं द्योत्यते । तदेव भृङ्गः मधुलिट् । भृङ्गपदेन रसलम्पटत्वं व्यज्यते । तस्य यो रसस्तस्य शृङ्गारादेः पुष्परसस्य च व्यासङ्गः प्राप्तिः स एव हेतुस्तस्मै । 'निमित्तकारणहेतुषु सर्वासां प्रायदर्शन'मिति वाचनिकी चतुर्थी । श्रीमद्भानुना श्रीः प्रतिभा कवित्वबीजभूतप्राग्भवीयसंस्कार इति यावत् । तद्वता भानुनाम्ना कविना । एषा बुद्धिस्था ।

विद्वदिति । रविणा विकाश्यमाना मञ्जरी यथा भृङ्गस्य रसास्वादाय भवति तथेयमपीत्यर्थः । तत्तु भानोः प्रकाशकत्वं मञ्जरीप्रकाशकत्वस्य कविक्षुण्णत्वाऽभावाच्चिन्त्यमित्याहुः ॥ २ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र रसेषु शृङ्गारस्याऽभ्यर्हितत्वेन तदालम्बनविभावत्वेन नायिका तावन्निरूप्यते । सा च त्रिविधा स्वीया परकीया सामान्यवनिता चेति। तत्र स्वामिन्येवाऽनुरक्ता

एवं च समूलत्वं द्योत्यते । रसमञ्जरी रसः शृङ्गारादिस्तद्वती मञ्जरीव मञ्जरी । यद्यपि रसवत्त्वं सभ्यानामेव तथापि आयुर्घृतमितिवदुपचारः । प्रतिपाद्यप्रतिपादकभावसम्बन्धेन तद्वत्त्वमित्यपि के चित् । प्रकाश्यते स्फुटीक्रियते । अन्यापि शोभाशालिरविणा विकासिता रसवती मञ्जरी भृङ्गव्यासङ्गहेतुर्भवति । एवं च रसाऽवाप्तिः प्रयोजनमभिहितम् ।

अत्र रसव्यासङ्गहेतोरुत्तरार्द्धपदार्थत्वेन काव्यलिङ्गमलङ्कारः । स च श्लेषच्छेकाऽनुप्रासाऽनुप्राणितः । वक्त्रं वृत्तम् ।

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः
गुरु षष्ठं तु पादानां शेषेष्वनियमो मतः ।
प्रयोगे प्रायिकं प्राहुः कप्येतद्वक्त्रलक्षणम् ॥ इति लक्षणात्॥२॥

प्रकृतमाह तत्रेत्यादिना । तत्र रसमञ्जर्यां रसेषु शृङ्गारस्य शृङ्गं प्राधान्यमियर्त्तीति शृङ्गारस्तस्य । ऋ गतावित्यस्मा-

प्रभ्यर्हितत्वेनेति । पुरुषोत्तमाश्रयत्वात्कृष्णदैवत्याच्च । तदालम्बनेत्यस्य च पुरुषोत्तमाश्रयालम्बनविभावत्वेनेत्यर्थः । एतेन नायकस्यापि तत्त्वात् नायिकायाः प्रथमतो निरूपणे बीजं चिन्त्यमित्यपास्तम् । "पूर्वं रक्ता भवेन्नारी पुमान्पश्चात्तदिङ्गितै"रितिक्रमानुसारेण तस्याः प्रथमतो निरूपणमित्याहुः । तत्र स्वामिनीति । स्वामी चात्र परिणीतः । एवकारेण तदतिरिक्ताऽननुरक्तत्वं लभ्यते । अनुरक्तत्वञ्चाऽनुरागयोग्यतावच्छेदकधर्मवत्त्वम् । तेन मुग्धायां नाऽतिव्याप्तिः । वस्तुतो लज्जाभयप्रधानायास्तस्या अपि नास्त्येवाऽनुरागः किं तु तत्प्रधानत्वादेव संवेद्य इत्यन्यदेतत् । अनुरागपदेनात्र शृङ्गारस्या-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वीया। न च परिणीतायां परगामिन्यामतिव्याप्तिः। अत्र पतिव्रताया एव लक्ष्यत्वात्। तस्याश्च परगामितया परकीयात्वमपि समायाति। अस्याश्चेष्टा भर्तुः शुश्रूषा, शीलसंरक्षण,मार्जवं, क्षमा चेति। यथा।

त्कर्मण्यण् अचो ञ्णितीति वृद्धिः। अभ्यर्हितत्वेन प्राधान्येन। अभ्यर्हितत्वेनेत्यत्र 'शाब्दी ह्याकाङ्क्षा शब्देनैव प्रशाम्यती'ति न्यायात् पुरुषोत्तमाश्रयत्वादिति हेतुपूरणम्। एवं च तच्छब्देन विशिष्टपरामर्शात् पुरुषोत्तमाश्रयशृङ्गाराऽऽलम्बनविभावत्वेन नायिका इति शेषः। तावत् नायकनिरूपणात्प्राक्। नायिका नयति वशीकरोति सा नायिका निरूप्यते निरूपणविषयीक्रियते। तद्विषयकं निरूपणं क्रियते इत्यर्थः। एवं च शृङ्गाराऽऽलम्बनविभावत्वस्य नायिकानायकयोस्तुल्यत्वे किमिति प्रथमतो न नायकनिरूपणमिति दूषणमलग्नकं वेदितव्यम्। ननु निरूपणीयनायिकानामनेकत्वात्कथमेकवचनमिति चेन्न। नायिकात्वस्य शृङ्गारालम्बनस्त्रीत्वरूपोपाधेः सर्वाऽनुगतत्वेन

यिभूता रतिर्गृह्यते। तेन मात्राद्यनुरागवत्यामेवकारो नास्तीति परास्तम्। एवकारव्यावर्त्यमाह। न चेति। उभयाऽनुरागवत्यामतिव्याप्तिः न त्विष्टापत्तिस्तत्राह पतिव्रताया एव लक्ष्यत्वात् इति। पत्यनुरागवत्यामेवेत्यर्थः। किञ्चाऽस्याः स्वीयात्वेन परकीयालक्षणस्य तत्राऽतिव्याप्तिरित्याह तस्याश्चेति। एवञ्च स्वीयालक्षणं एवकारं दत्वा तस्याः परकीयात्वमेव वक्तुं युक्तमिति भावः। वैपरीत्यं तु सिद्धान्तविरोध इति भावः। वस्तुतो ऽव्याप्तिरिति पाठस्तादृश्याः स्वीयात्वं मन्यमानस्य शङ्केति ध्येयम्। शीलं सद्वृत्तम्। आर्जवमकुटिलता।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्वती निरूप्यतइत्यर्थान्न का चित्क्षतिः । ऋजवस्तु आलम्बनविभावत्वेनात्राऽऽश्रयमात्रमुच्यते । तथा च नायकविषयकरत्याश्रयत्वं नायिकायां यथा तथा नायिकाविषयकरत्याश्रयत्वं नायकेपीति तुल्यत्वेपि यथा 'पूर्वं रक्ता भवेन्नारी पुमान् पश्चात्तदिङ्गितै'रित्युक्त्या पूर्वं नायिकाऽनुरागो निरूप्यते तथा नायिका प्रथमतो निरूप्यते इति सकलकविसंप्रदायाऽनुरोधादेवमभिहितमित्याहुः । सा चेति चस्त्वर्थे । त्रिधा त्रिविधोपाधिमती । एतदेव विवृणोति । स्वकीयेत्यादिना । तत्र प्रथमोद्दिष्टत्वात् स्वीयां लक्षयति तत्रेत्यादि । तत्र तास्वित्यर्थः । पत्यतिरक्ताऽननुरक्तत्वे सति पत्यनुरक्तत्वं स्वीयात्वम् । तद्वती स्वीयेत्यर्थः । मुग्धायां पत्यनुरागाऽयोग्यत्वादज्ञानादिप्रतिबन्धकत्वाद्वा नाऽव्याप्तिः । ननु तथापि मात्राद्यनुरागवत्यां तस्यां सत्यन्ताऽभावादव्याप्तिरिति चेन्न । अनुरागपदेन रतेरत्र विवक्षितत्वात् । सत्यम् । तद्व्यावर्त्यमाह । न चेत्यादि । परिणीतायां पत्यनुरागवत्यां परगामिन्यां पराऽनुरागवत्यां पतितदतिरिक्ताऽनुरागवत्यामित्यर्थः । अव्याप्तिः । व्यापनं व्याप्तिः । लक्षणस्य लक्ष्यमात्रसत्त्वम् । तदभावः अव्याप्तिः । लक्ष्याऽतिरिक्तसत्त्वम् । न चेति स्वरविशेषसूचितया काक्वा लक्षणासत्त्वमस्तीत्यर्थः । नन्वेतस्या लक्ष्यत्वान्न लक्षणासत्त्वं विरोधीत्यत आह । अत्रेत्यादि । अत्र अस्मिन् रसिकशास्त्रे । पतिव्रताया एव लक्ष्यत्वात् स्वीयात्वेनेति शेषः । तस्मात्सत्यन्तमावश्यकमिति भावः । ननु तर्ह्युभयाऽनुरागवत्याः कुत्राऽन्तर्भाव इति आह । तस्याश्चेति । चस्त्वर्थे । उभयाऽनुरागवत्यामित्यर्थः । परगामितया पराऽनुरागवत्त्वेन । अपिरवधारणे । परकीयात्वमेवेत्यर्थः । उभयाऽनुरागवत्याः स्वीयात्वं मन्वानः शङ्कते न चेत्यादि । अव्याप्तिः । सत्यन्ताऽभावादित्यर्थः । उत्तरमाह अत्रेत्यादि । त-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गताऽऽगतकुतूहलं नयनयोरपाङ्गावधि
स्मितं कुलनतभ्रुवामधरएव विश्राम्यति ।
वचः प्रियतमश्रुतेरतिथिरेव कोपक्रमः
कदा चिदपि चेत्तदा मनसि केवलं मज्जति ॥ ३ ॥

स्याः कुत्राऽन्तर्भाव इत्यत आह तस्याश्चेत्यादीति । ऋजवस्तु उक्तलक्षणस्य प्रत्यक्षाऽविषयत्वात्तज्ज्ञानाय तस्याश्चेष्टामाह । अस्याश्चेष्टेत्यादि । भर्तुः विधिवत्पाणिग्रहणकर्तुः । शुश्रूषा । परिचर्या । मुग्धादिषु पतिशुश्रूषायोग्यत्वादज्ञानादिप्रतिबद्धत्वाद्वैतचेष्टासङ्गतिः । शीलस्य सद्वृत्तस्य । शीलं स्वभावे सद्वृत्ते इति विश्वः । संरक्षणमनन्यथाकरणम् । आर्जवम् । अकौटिल्यम् । क्षमा शान्तिः । ननु लक्षणज्ञानस्य किं फलमिति चेदितरव्यावृत्त्यादिकमेवेति गृहाण ।

चेष्टामेवोदाहरणमुखेनाह । यथेत्यादि । कुलनतभ्रुवां कुलस्य अन्वयस्य । सन्ततिर्गोत्रजननकुलान्यभिजनाऽन्वयावित्यमरः । नते नम्रे मदनचापवदिति भावः । भ्रुवौ ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियामित्यमरः । यासां ताः कुलनतभ्रुवः तासाम् । यद्वा कुले स्वजने नतभ्रुवः नम्रदृष्टयः किं पुनरन्यत्रेति भावः । नयनयो-

गतागतेति । प्रेरणाकुञ्चनविषयककौतुकम् । अपाङ्गो नेत्रप्रान्तः । मन्मथकुतूहलेन कदा चित्कदा चिद्व्यज्यते । तदपि नायकमनोविकारपर्यन्तमेवेति भावः । अधरएवेति । तमुल्लङ्घ्य बहिर्न प्रसरति । अनेन च शीलसंरक्षणम् । श्रुतेरेव न श्रवणयोः । अतिथित्वेन कादाचित्कत्वमतिप्रियत्वं वा । यद्वा अतिथेर्मानाऽपमानयोः समानत्वं स्वविषयकार्याऽनुष्ठानाऽननुष्ठानयोः समत्वेन समानत्वं व्यज्यते । इति नास्त्येव सः । यदि भवेत्तदा क्रमः आरम्भ एव न परिपोषः तदा मनस्येव न बहिस्तद्व्यञ्जिका चेष्टेति ऋजुत्वं ध्वन्यते ॥ ३ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्नेत्रयोः । लोचनं नयनं नेत्रमित्यमरः । गताऽऽगतकुतूहलम् । गतं प्रेरणम् । आगतमाकुञ्चनम् । तद्विषयकं यत्कुतूहलं, कुतुकं तु कुतूहलमित्यमरः । कुतूहलं कदा चिदेव भवति न सर्वदेति गताऽऽगतयोः कादाचित्कत्वं, तत्रापि तदप्येकं न बहूनीति व्यासङ्गान्तरोत्पत्तिभीतिद्वारा भर्तुः शुश्रूषा ऽभिव्यज्यते । अपाङ्गावधिः । अपाङ्गौ नेत्रप्रान्तौ । अपाङ्गौ नेत्रयोः प्रान्तौ इत्यमरः । तदवधि तत्परिच्छिन्नं तत्परिच्छेदे विले ऽवधिरित्यमरः । यद्वा । अपगतान्यङ्गानि यस्येत्यपाङ्गः । अनङ्ग इत्यर्थः । तदवधि तावत्पर्यन्तम् । एवं च नयनयोः कदा चिदेव गतागतं तदपि नायकमनोविकारपर्यन्तमिति भावः । कुलनतभ्रुवामित्यग्रेप्यन्वेति । स्मितं न तु हसितम् । तदप्यधरे एवमधरेष्वेव न गण्डादिषु विश्राम्यति विश्रान्तिं याति । न तमुल्लङ्घ्य गच्छतीत्यर्थः । अन्योपि यो यत्र विश्रान्तिं प्राप्नोति स तद्विहायाऽन्यत्र न गच्छतीति । एवं च न कदाप्यूर्ध्वास्यहास्यता ऽस्या इति शीलसंरक्षणमभिव्यज्यते । वचः । उच्यते इति वचः । वक्तुं योग्यमित्यर्थः । तदप्येकं प्रियतमश्रुतेः । अतिशयेन प्रियः प्रियतमः । एवं चाऽतिशयप्रेमवत्तया संलापयोग्यत्वं द्योत्यते । तस्य श्रुतेः श्रवणयोः । एवं च यत्र वक्तुं युक्तस्याप्येकस्यापि वचसः संलापयोग्यप्रियतमाऽपरश्रुतिविषयता न भवति तत्र का वार्त्ता ऽन्यश्रुतिविषयतायामिति भावः । अतिथिरेव आवेशक एव स्यादावेशक आगन्तुरतिथिर्ना गृहागते इत्यमरः । एवं चातिथिर्यथाक्षणमेव तिष्ठन् मानाऽपमानयोः समस्तथा स्वोदीरितवचनार्थाऽनुष्ठानाऽननुष्ठानाऽन्यतरकारिण्यपि प्रियतमे समानप्रेमशालित्वमिति क्षमावत्त्वं द्योत्यते । तथा कदा चिदपि केनापि कालविशेषेण चेत् यदि कोपक्रमः कोपस्य अमर्षस्य क्रम आरम्भः । एवं च न कदापि कोपपरिपोष इति ऋजुत्वं ध्व-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वीया तु त्रिविधा । मुग्धा मध्या प्रगल्भा चेति । तत्राऽङ्कुरितयौवना मुग्धा । सा च ज्ञातयौवना ऽज्ञातयौवना च । सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढा । सैव क्रमशः सप्रश्रया विश्रब्धनवोढा । अस्याश्चेष्टा

न्यते । तदा केवलं कृत्स्नं केवलमिति त्रिलिङ्गं त्वेकृत्स्नयोरित्यमरः । मनसि हृदये मज्जति । एवं च मनस्यतिगाम्भीर्यमभिव्यज्यते । स्वभावोक्तिरलङ्कारः । लक्षणं च "स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णन"मिति । पृथ्वी वृत्तम् ।

पयोधरयुता स्फुरत्कनकयुग्मताटङ्किनी
सुवर्णरुचिकङ्कणा ललितभाववन्नूपुरा ।
सुगन्धिरुचिरा लसच्छ्रवणरूपवत्कुण्डला
भुजङ्गपतिवर्णिता हरति हन्त पृथ्वी मनः ॥

इति तल्लक्षणात् ॥ ३ ॥

स्वीयाविभागमाह स्वीया तु त्रिविधेति । त्रैविध्यमुपपादयति । मुग्धेत्यादि । मुग्धां लक्षयति । तत्रेत्यादि । तत्र तास्वित्यर्थः । अङ्कुराः सञ्जाता यस्येत्यङ्कुरितं तदस्य सञ्जातमिति तारकादित्वादितच् । एवंभूतं यौवनं तारुण्यं यस्या इति । अङ्कुरादेर्वृक्षधर्मत्वात् यौवने बाधात् प्रत्यग्रत्वं लक्ष्यते

तत्राङ्कुरितेति । अङ्कुरितत्वेन प्रत्यग्रत्वं लक्ष्यते । पत्यतिरिक्ताऽननुरागवत्त्वे सति प्रत्यग्रयौवनात्वं मुग्धात्वम् । सत्यन्तेनाऽङ्कुरितयौवनसामान्यवनितायां नाऽतिव्याप्तिः । सा चेति । न ज्ञातं यौवनं यया इति यस्या इति वा विग्रहः । एवमपरत्र । ययेत्येवेत्यपरे । ज्ञातयौवनत्वादिविशेषितमुग्धालक्षणमेव तयोर्लक्षणं बोध्यम । सैवेति । ज्ञाताऽज्ञातयौवना मुग्धैव । क्रमशः । पूर्वं लज्जैव ततो नायकदर्शनस्पर्शनभयमिति भावः । पराधीनेति । लज्जाभयाभ्यां पराधीना तत्प्रधाना । न तु

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियाह्रिया मनोहरा कोपे मार्दवं नवविभूषणे समीहा च ।

तेन च शोभाऽतिशयो व्यज्यते । एवं च पतिमात्राऽनुरागवत्त्वे सति प्रत्यग्रयौवनवत्त्वमिति फलितं मुग्धालक्षणम् । तेन सामान्यवनितामतिपालितासु अङ्कुरितयौवनासु नाऽतिव्याप्तिः । मुग्धामपि विभजते । सा चेत्यादि । अज्ञातमनवगतं यौवनं यया यस्या इति वा। एवमपरत्रेति प्राञ्चः। वयं तु न ज्ञातं यौवनं यस्याः, ज्ञातं यौवनं यया इत्येवार्थ इति ब्रूमः । स्वयम्भूरित्यत्र तस्या यथा यौवनं ज्ञातं तथा वक्ष्यामः । अत्र चाऽज्ञायमानत्वज्ञायमानत्वविशेषितं मुग्धालक्षणमेव द्वयोर्लक्षणं वेदितव्यम् । तामेव पुनर्व्यवहारेण विशिनष्टि सैवेत्यादि । सैव अज्ञातयौवना ज्ञातयौवना मुग्धैव । क्रमशः समयविशेषक्रमादित्यर्थः । लज्जा अधार्ष्ट्यम् । भयं रतेरपरिचयेन शङ्का । ताभ्यां पराधीना तत्प्रधाना रतिः सम्भोगो यस्याः सा । नवोढा नवम् अभिनवं यथा स्यात्तथा ऊढा भर्त्रा सम्भोगादिव्यापारं प्रापिता । न च क्रमश इत्यनेन विशेष्यविशेषणयोर्यथासङ्ख्यत्वेनाऽज्ञातयौवनालज्जापराधीनरतिः, ज्ञातयौवना भयपराधीनरतिरिति शङ्क्यम् । प्रत्येकमुभयव्यापारदर्शनात् । अत्र च लज्जाभयप्रधानरतिकत्वाऽज्ञायमानज्ञायमानयौवनत्वाऽन्यतरत्वविशेषितं मुग्धालक्षणमेव नवोढालक्षणं बोध्यम् । वस्तुतस्तु तन्मात्रधर्मवत्त्वमेव तल्लक्षणमिह बोध्यम् । तामेव पुनर्व्यवहारान्तरेण विशिनष्टि सैवेत्यादि । सैव लज्जाभयपराधीनरत्य-

तद्विरोधेन स्वकार्यक्षमेति भावः । एवञ्च लज्जाभयप्रधानरतिकत्वे सति ज्ञायमानत्वादिघटितं मुग्धालक्षणमस्या लक्षणम् । सैव नवोढैव । प्रश्रयो विश्वासः । क्रियेति । सलज्जव्यापारकरणान्मनोवशकर्त्री । क्रियाविषयलज्जयेत्यक्षरार्थः । मार्दवमल्पाऽपनेयता ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुग्धा यथा ।

आज्ञप्तं किल कामदेवधरणीपालेन काले शुभे
वस्तुं वास्तुविधिं विधास्यति तनौ तारुण्यमेणीदृशः ।

ज्ञातयौवना ऽज्ञातयौवना मुग्धा नवोढैव क्रमेण समयविशेषेण। सप्रश्रया प्रश्रयो विनयः गात्राकुञ्चनमिति यावत् । तत्सहिता । यद्वा किञ्चिद्विश्वासं प्राप्ता विश्रब्धनवोढेत्युच्यते । ननु मुग्धालक्षणं कथं ज्ञातव्यमित्यत आह अस्याश्चेष्टेत्यादि । क्रियाह्रिया मनोहरा । क्रिया व्यापारस्तद्विषयिकया ह्रिया लज्जया मनो हरति सा । सलज्जव्यापारवत्या युक्तमेव वशीकरणम् । कोपे क्रोधे मार्दवम् अल्पाऽपनेयता । नवविभूषणे समीहा नूतनाऽऽभरणे समीहा जिघृक्षा ।

मुग्धोदाहरणमाह आज्ञप्तमिति । का चित् कां चित् प्रत्याह कामदेवधरणीपालेन दीव्यतीति देवो विजिगीषारसिको यः कामो मदनः स एव धरणीपालो महीपालस्तेन । यद्यपि देवशब्दस्योपसर्जनपूर्वनिपातः प्राप्तस्तथापि विजिगीषायाः प्राधान्यविवक्षणान्न पूर्वनिपातः । एवं धरणीपालशब्देपि । कामपदेन कमनीयरूपनाशालिनः कामिनीतनुभूमावेव वसतिरुचितेति ध्वन्यते । देवपदेन विजिगीषोर्जयभूमिकापरिग्रहस्याऽऽवश्यकत्वेन तथाविधाऽऽज्ञाकरणस्यौचिती व्यज्यते । धरणीपालपदेनाऽनुल्लङ्घनीयाज्ञत्वमावेद्यते । तृतीयया दूताद्यद्वारकस्वकृताऽऽज्ञावशाद् वास्तुविधानरूपे कार्ये शीघ्रविधेयत्वं, तारुण्येनाऽतिश-

आज्ञप्तमिति । मदनेन राज्ञा एणीदृशस्तनौ वस्तुमाज्ञप्तं तारुण्यं वास्तु विधास्यतीति हेतोः दृष्ट्यादिभिस्तत्तदामन्त्र्यते इत्यन्वयः । अत्र राजपदेनाऽनुलङ्घनीयाज्ञत्वम, देवत्वेन जेतृता, कामत्वेन कामिनीतनुभूमाववस्थानयोग्यता च ध्वन्यते । तनौ कृशाऽभिन्ने शरीरे इत्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृष्ट्या खञ्जनचातुरी मुखरुचा सौधाधरी माधुरी
वाचा किञ्च सुधासमुद्रलहरीलावण्यमामन्त्र्यते ॥ ४ ॥

यितप्रेमास्पदत्वं द्योत्यते । एणीदृशो मृगलोचनायाः । तनौ शरीरे । तनुपदेन सङ्कीर्णत्वप्रतिपादनद्वारा अन्येषां दुर्गमभूमित्वं, तेन चाऽऽवश्यकवसतियोग्यत्वं ज्ञाप्यते । शुभे कल्याणकारिणि काले समये वस्तुं वासं कर्त्तुम् आज्ञप्तम् । अमात्यभूते त्वयि कामिनीतनौ स्थितवति मया ऽपि तत्राऽऽगन्तव्यमचिरादेव । किं च तत्राऽधिवसतिं विधाय सकलजगज्जयोऽस्मद्धस्ते एवेत्यपि बोधितम् । अन्योपि राजा साऽमात्यो दुर्गाद्याश्रित्येतरजयं करोतीति लोके प्रसिद्धम् । तारुण्यं यौवनम् । किल निश्चयेन । वास्तुविधिं सुखविशेषशालिचिरकालाऽवस्थितिफलदवास्तुदेवतापूजनविधिम् । वास्तुविधिमिति द्वितीयानिर्देशादीप्सिततमत्वप्रतिपादनेनाऽवश्यकर्तव्यत्वमावेद्यते तेन च सुतनुतनुरमणीयत्वम् । विधास्यति करिष्यतीति हेतोः । दृष्ट्या खञ्जनचातुरी खञ्जरीटस्य चातुरी वैदग्धी । चतुरशब्दात् ष्यञि तदन्तात् षिद्गौरादिभ्यश्चेति ङीषि यस्येति चेत्यकारलोपे हलस्तद्धितस्येति यकारलोपे रूपम् । यद्यप्येणीदृश इत्यनेनैव कृशत्वेनाऽन्येषां दुर्गमत्वम् । खञ्जनचातुरी नीलकटाक्षविक्षेपरीतिमत्त्वम् । यद्वा यथा स निधिमहेशयोगशाली तथा गुणवदेकान्तविषयशालित्वम् । एतेनैणीदृक्पदेनैव दैर्घ्यचापल्ययोर्लाभादिदं गतार्थमित्यपास्तम् । यद्वा खञ्जरीटस्य समयविशेषसञ्चारवत्कादाचित्कत्वेन सलज्जव्यापारमनोहरत्वम् । सौधाधरी ऐन्दवी । तेन सर्वदा प्रसन्नतया कोपाऽभाववत्त्वं कठोरत्वाऽभावेनाऽल्पापनेयता वा सुधेति जीवनदातृत्वम्, समुद्रपदेन समर्यादत्वम्, लहरीपदेन प्रतिक्षणविलक्षणरसवत्त्वम्, अत्र लहरीपदेन नवनवसमीहा व्यज्यते इत्याहुः ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैर्घ्यचपलत्वयोः प्रतीत्या गतार्थमेतत् तथापि नीलकटाक्षविक्षेपैरीतिमत्त्वम् । अथ वा यथा खञ्जरीटस्य समयविशेषे सञ्चारस्तथा कटाक्षविक्षेपणम् । अथ वा यथा तस्य सूक्ष्मविषयदूरदर्शित्वं तथा ऽतिसूक्ष्मदर्शित्वम् । अथ वा यथा तस्याऽवश्यं निधिमदेकप्रदेशयोगशालित्वं तथा गुणविशेषवदेकान्तविषयप्रेमशालित्वं द्योत्यते इति न तेन गतार्थमेतत् । यद्वा ऽत्र एणीदृक्पदं स्वपर्यायमृगदृक्पदोपलक्षकम् । एवं च मृग्यते गवेष्यते न त्विततस्ततः स्वयं सञ्चरति तद्दृक्समा दृक् यस्या इत्यभिधानात् । क्रियाद्विया मनोहरत्वमावेद्यते । वस्तुतस्तु एतीत्येणः तस्येयमिति यातायातवत्सम्बुद्ध्युत्कीर्तनेन स्वतस्तदभावेन तदेत्राऽऽवेद्यतइति न तच्छङ्कापि । किं च मुखरुचा वदनदीप्त्या । रुक्पदेन प्रियतमस्वान्ताऽन्तर्वर्तिक्लेशतमसो निरासकत्वं व्यज्यते । सौधाधरी सुष्ठु शोभनो रसो धीयते यस्यां सा सुधा तस्या धरः सुधाधरः तस्येयं सौधाधरी । तस्येदमित्यणि टिड्ढाणञिति ङीप् । सुधाधरपदेन समीचीनग्राहकत्वं तेन च न कदापि कोपरूपमालिन्यवत्त्वमिति द्योत्यते । यद्वा सुधामप्यधरयति तिरस्करोति ततोप्यधिकरसवत्तया रसाऽपकर्षककठोरकोपाऽनङ्गीकारप्रदर्शनमुखेन कोपे ऽल्पापनेयत्वमाविष्क्रियते । माधुरी मधुरिमा । चातुरीवत् साधना । किं च वाचा वक्तुं युक्ता वाक् तया वाण्या । एवं च वाचि युक्तत्वरूपभूषणत्वेपि सुधासमुद्रलहरीलावण्यस्पृहावत्त्वात् नवविभूषणसमीहा ऽभिव्यज्यते । सुधासमुद्रलहरीलावण्यं सुधायाः पीयूषस्य समुद्रः सागरः तस्य लहर्यः तासाम् । लावण्यं सौन्दर्यम् । सुधापदेन जीवनदाननिपुणत्वं, समुद्रपदेन समर्यादत्वं, लहरीपदेन प्रतिक्षणविलक्षणरसवत्त्वं च ध्वन्यते ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अज्ञातयौवना यथा ।

नीराक्षीरमुपागता श्रवणयोः सीम्नि स्फुरन्नेत्रयोः
श्रोत्रे लग्नमिदं किमुत्पलमिति ज्ञातुं करं न्यस्यति ।

चातुरीमाधुरीलावण्यपदैः चातुर्यमाधुर्यलावण्यानां मनुष्यद्राक्षादिधर्मत्वात् खञ्जनचन्द्रलहरीषु बाधात्स्वापतितमनस्कत्वाऽऽल्लहादकत्वोज्ज्वलत्वानि लक्ष्यन्ते । तैश्चाऽलौकिकचमत्कारकारित्वचर्वणविषयत्वसदन्तस्मितज्योत्स्नावत्त्वानि व्यज्यन्ते । तैश्चाऽतिदुर्लभत्वाऽवश्यस्पृहणीयत्वप्रियतमहृदयाऽऽधितमोनिरासकत्वानि द्योत्यन्ते । दृष्टिमुखरुक्चातुरीमाधुरीति च स्त्रीलिङ्गनिर्देशात् स्त्रीणामेव स्त्रीणामाह्लानौचित्यं व्यनक्ति । वाचेति स्त्रीलिङ्गनिर्देशात् लावण्यमिति नपुंसकलिङ्गनिर्देशात् स्त्रियः षण्ढाऽऽकारणौचित्यं द्योत्यते । लावण्यमिति नपुंसकलिङ्गेन राजमदने सौविदल्लसत्त्वौचित्यं प्रदर्श्यते । तृतीयानिर्देशेन परस्परनिरपेक्षतया चातुर्याद्याह्लानकारित्वेन मदनमहीपतिसेवाऽतिशयो दृष्ट्यादीनामावेद्यते । आमन्त्र्यते । इदं च त्रिष्वप्यन्वेति । मदनमहीपतेः आज्ञया अमायेन यौवनेन कामिनीतनौ समागतम् अतो भवद्भिरपि तत्राऽऽगन्तव्यमित्याकार्यतइत्यर्थः । दृष्ट्यादीनामप्रेरितत्वेपि खञ्जनचातुर्याद्याकारणेन मदनमहीपतिसेवाप्रावीण्यमावेद्यते । शार्दूलविक्रीडितं वृत्तम् । लक्षणं तूक्तम् ॥ ४ ॥

एवं मुग्धां वयःसन्धिरूपेणोदाहृत्य विशिष्टामुदाहरति । अज्ञातयौवनेत्यादि ।

नीराक्षीरमिति । तटमुप तटसमीपं प्राप्ता न तु तटम् । तेनाऽऽकस्मिकतथाविधशङ्काकवलितहृदयतया आर्द्रवसनत्यागशाटीपरिधा-

CC-0. Prof, Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीरादिति । नीरात् नयति तन्नीरं तस्मादुदकादित्यर्थः । तथा चाऽऽकस्मिकनितम्बगौरवादागन्तुमशक्तापि तल्लहरीभिरेवाऽऽनीतेति भावः । तीरं तटम् । ईप्सिततमत्वबोधिकया द्वितीयया सलिलविहारसञ्जातनयनकमलशैवालसङ्गभ्रमशरीरसादवत्तया जले ऽतिद्वेषवत्ता द्योत्यते । उपागता उप समीपमागता न तु तटं प्राप्ता । एवं चाऽऽकालिकतथाविधशङ्काकवलितहृदया आर्द्रवसनपरित्यागतटस्थशाटीपरिधानादिकर्तव्यताज्ञानशून्या जातेति ध्वन्यते । शशिमुखी शशो ऽस्यास्तीति शशी तत्तुल्यमुखी । एवं च तथाविधशङ्कासञ्जातविलक्षणशोभाशालित्वं व्यज्यते । नायिका श्रोत्रे कर्णे किमिदमुत्पलं कुवलयं न तु कुवलये । एवं च नयनयोर्विशालताऽतिशयो व्यज्यते । लग्नं संबद्धम् । एवं च जलविहारवशात्संबन्धमापन्नं न तु बुद्धिपुरःसरं स्थापितमिति भावः । एवं चैतज्ज्ञानाय करन्यसनमुचितमेवेति गम्यते । इति ज्ञातुमवगन्तुं स्फुरन्नेत्रयोः श्रवणयोः सीम्नि मर्यादायाम् । एकवचनेन सीम्नोः समानत्वं सप्तम्या चाऽधिकरणप्रतिपादनद्वारा नेत्रस्फुरणधर्मत्वेन वितर्को व्यज्यते । करं न्यस्यति व्यापारयति । एवं च श्रोत्रे इत्यस्य नायिकासंशयकोट्यन्तर्गतत्वेन श्रवणयोरित्यस्य च कविवाक्याऽन्तर्गतत्वेन न पुनरुक्तिशङ्केति प्राञ्चस्तन्न । वैयधिकरण्यापत्तेः । वयं तु नीरात्तीरमुपागता । एवं चाऽवतंसयोग्योत्पलप्राप्त्यौचित्यं व्यज्यते । श्रोत्रे स्फुरत् शोभमानम् । एवं च श्रोत्रसीमासंबन्धयोग्यत्वं ध्वन्यते । तेन च संशयौचित्यम् । इदमुत्पलम् । एकवचनं क्षणक्षणविलक्षणशोभोत्कर्षाऽऽधाननिदानपर्यायन्यासौचित्यं व्यनक्ति । श्रवणयोः नेत्रयोः सीम्नि किं लग्नमिति ज्ञातुं करं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शैवालाऽङ्कुरशङ्कया शशिमुखी रोमावलीं प्रोञ्छति
श्रान्तास्मीति मुहुः सखीमविदितश्रोणीभरा पृच्छति ॥ ५ ॥

न्यस्यति । अर्थात्सीम्नीत्येकत्वमविवक्षितम् । करमित्येकवचनेनैककरस्यैवोभयत्र द्रुततरव्यापारकरणात्संभ्रमाऽतिशयो व्यज्यते इति ब्रूमः । वस्तुतस्तु संभ्रमाऽतिशयपोषकतया वैयधिकरण्यं न दोषाय । यत्तु स्फुरन्नेत्रयोः श्रवणयोः सीम्नि किम् उत्पलं लग्नम् इति ज्ञातुं श्रोत्रे करं न्यस्यतीत्याह । तन्न । ज्ञातयौवनत्वापत्तेः । किं च शैवालं जलनीली । जलनीली तु शैवालमित्यमरः । तस्याङ्कुरः तत्संशयेन । समानगुणत्वादिति भावः । अङ्कुरपदं सौन्दर्याऽतिशयमेकवचनं चाऽतिसूक्ष्मत्वं व्यनक्ति । रोमावलीं रोमोद्गमश्रेणीं प्रोञ्छति अवचिनोति । उञ्छाऽवचयेन स्पृशतीत्यर्थः । अर्थादपरेण करेण । किं च अविदितश्रोणीभरा अविज्ञातनितम्बगौरवा । जलविहारेणापि

नज्ञानशून्यता व्यज्यते । श्रोत्रे किमुत्पलं लग्नमिति ज्ञातुं स्फुरन्नेत्रयोः सीम्नि करं न्यस्यतीत्यन्वय इति के चित् । तन्न । अन्यत्र लग्नत्वशङ्का अन्यत्र करस्पर्श इति वैयधिकरण्यापत्तेः । तस्मात् श्रोत्रे स्फुरत् शोभमानम् । अनेन श्रोत्रसीमासम्बन्धयोग्यतया संशयौचित्यम् । इदमुत्पलं श्रवणयोः नेत्रसीम्नि लग्नं जलक्रीडावशात्संबन्धमापन्नं किमिति ज्ञातुमित्यन्वयः । करमित्येकवचनेनैककरस्यैव तथा व्यापारेण सम्भ्रमाऽतिशयः । पूर्वमते वैयधिकरण्यमप्येतत्पोषायैवेत्यप्याहुः । के चित्तु श्रोत्रे विद्यमानं स्फुरन्नेत्रयोः सीम्नि किं लग्नमिति श्रवणयोः करं न्यस्यतीत्याहुः । इयञ्च शङ्का जले प्रतिबिम्बं दृष्ट्वा जातेति बोध्यम् । प्रोञ्छतीति । अर्थादपरेण करेणेति बोध्यम् । मुहुरिति सर्वत्राऽन्वेति । सख्या उत्तरे दत्तेपि मुग्धात्वादेव पुनः पुनः प्रश्नः ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञातयौवना यथा ।

स्वयम्भूः शम्भुरम्भोजलोचने त्वत्पयोधरः ।

तत्संभवादिति भावः । सखीं वयस्याम् । श्रान्ता ऽस्मि श्रमं गतास्मि । मुहुः वारं वारम् । तारुण्याऽज्ञानाद्वयस्यया इमां प्रत्युत्तरे दत्तेपि पुनः प्रश्नात्संशयाऽतिशयो द्योत्यते । इदं च प्रागप्यन्वेति । पृच्छति जिज्ञासापूर्वं वक्तीत्यर्थः । न्यस्यति प्रोञ्छति पृच्छतीति लटा न्यसनप्रोञ्छनप्रश्नानां वर्त्तमानत्वबोधनान्नयनविशालता, रोमोद्गमनितम्बगौरवाऽज्ञानादज्ञातयौवनात्वं बोध्यते । यद्यप्यविदितश्रोणीभरेत्यनेनाऽज्ञातयौवनात्वस्य स्फुटमवगमान्नोत्तमकाव्यत्वं तदंशे, तथाप्यन्यत्र सर्वत्रोक्तरीत्योत्तमत्वप्रदर्शनान्न तथा क्षतिः । अत्र नेत्ररोमावल्योरारोप्यमाणयोरुत्पलशैवलाङ्कुरयोरज्ञातत्वलक्षणप्रकृतोपयोगितया परिणामाऽलंकाराऽनुप्राणितो द्वितीयचतुर्थचरणोद्भावितः संशयाऽलंकारः । "आरोप्यमाणस्य प्रकृतोपयोगितया परिणाम" इति तल्लक्षणात् । संशयलक्षणं काव्यप्रकाशे । "ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशय" इति । स चाऽसंबन्धे संबन्धलक्षणाऽतिशयोक्तिशङ्कोद्भावितभ्रान्तिमदलंकाराभ्यां संसृज्यते । शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

ज्ञातयौवनामुदाहरति ज्ञातयौवना यथेति । का चिदज्ञाततत्पतिका ज्ञातयौवनां नायिकां प्रति वदति । भो अम्भोजलोचने अम्भसि जातमम्भोजम् । एवं च दृशि सरसत्वं द्योत्यते।

स्वयंभूरिति । स्वयम्भूर्न तु नायककरवर्द्धितः । शम्भुः सुखजनकः शिवश्च । पयो न धरतीति विग्रहस्तेन न विरोधः । पयोधरपदस्य स्तने रूढत्वाद्वा न विरोधसम्भावना । कस्य धन्यस्य नखेन

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Siddhanta eGangotri Channel and eGangotri

नखेन कस्य धन्यस्य चन्द्रचूडो भविष्यति ॥६॥

तद्वल्लोचने नेत्रे यस्याः सा तत्संबुद्धिः। स्वयंभूः स्वयं भवतीति क्विप्। अनुत्पादितः। तथा शम्भुः शं सुखं तस्मै भवतीति शंभुः। सुखोत्पादक इत्यर्थः। मितद्रादिभ्य उपसंख्यानमिति भवतेर्डुप्रत्ययः। त्वत्पयोधरः भवत्कुचः। कस्य अविज्ञातस्य। धन्यस्य सौभाग्यशालिनः नखेन करजेन चन्द्रचूडः चन्द्रवच्चन्द्रः स चूडायां मस्तके ऽस्येति स एतादृशः भविष्यति सेत्स्यति। को नाम धन्यस्ते पतिर्यन्नखेनाऽयं चन्द्रचूडतामेष्यतीति भावः। इति प्राचां व्याख्या। धन्यस्य भाग्यवतस्तव प्रियस्य दक्षिणकरस्य वामकरस्य वा नखेन चन्द्रचूडो भविष्यतीत्यपि वदन्ति। मादृशां तु का चित्सखी करकलितकमलकुड्मलस्य स्वीयकुचचकोरकसमानतामालोचयमानां नायिकां प्रत्याह भो अम्भोजलोचने। अम्भसि जातमम्भोजं तत् लोचयति पश्यति तत्सम्बोधनम्। कृत्यल्युटो बहुलमिति बहुलग्रहणात् कर्तर्यपि ल्युट्। कमलकुड्मलनिजकुचचकोरकसमानताविचारकारिणि त्वत्पयोधरः त्वत्सम्बन्धिपयोधर इव पयोधरः। एवं च यथा पयोधरोदयमवेक्ष्य नीलकण्ठा नरीनृत्यन्ति तद्वदस्मदादिसखीजनमनांसि एतद्दर्शनेन नर्तनमित्वाऽऽचरन्तीति द्योत्यते। यद्वा।

चन्द्र इव चन्द्रः स चूडायां चूचुके यस्य तादृशो भविष्यतीति। अत्रेदृशसखीप्रश्नेनैव पृच्छ्यमानाया ज्ञातयौवनात्वं गम्यते। यद्वा कस्येति सखीप्रश्ने धन्यस्येति नायिकोत्तरम्। यद्वा करकलितकमलेन स्वकुचसाम्यं सम्भाव्य पश्यन्तीं नायिकां प्रति कमलाऽपेक्षया व्यतिरेकबोधकं सखीवाक्यमित्याहुः। पयोधरो भविष्यति कस्यापि धन्यस्य नखेन चन्द्रचूडो भविष्यतीत्यन्वयः ॥ ६ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पयोधरश्चिरतरसन्तापतापितचकोरचित्ताऽद्भुताऽऽनन्दजनकस्तथा ऽयमपि मदनाऽनलकवलितकान्तस्वान्तसन्तोषपोषजनक इति ध्वन्यते । ननु मेघसाधारणधर्मवत्ताप्रतिपादनाय यौगिकाऽङ्गीकारस्याऽऽवश्यकत्वादेतस्यास्त्वप्रसूतायास्तद्बाधात् कथमेतदिति चेत् ।

क्षीरनाड्यः कुमारीणां जलेन परिपूरिताः ।
क्षीरं न स्रवते तस्मादार्तवं चाऽधिकं यतः ॥
प्रसूतासु च नारीषु जलेन सह स्रूयते ।
तेन स्रोतोविशुद्धिः स्यात् क्षीरमाशु प्रवर्तते ॥

इत्यायुर्वेदादप्रसूतास्तनयोरपि पयोवत्त्वात् युक्तैव यौगिकता । पयोधर इत्येकवचनेनोदयसमयमेवाऽऽन्तरशून्यत्वं किं पुनरग्रिमं तदिति व्यज्यते । स्वयंभूः । न तु केन चिदुत्पादितः । प्रियतमकरपरामर्शशून्य इत्यर्थः । एवञ्चाऽवश्यसेवनीयत्वमावेद्यते । अथ च शम्भुः सुखजनकः न तु दुःखजनकः । अर्थान्निजप्रियतमस्य । एवं च सुखदुःखोभयजनकविषयविशेषवत्तयेदं ध्वन्यते । एतादृशः सन् कस्य चित् अगणितगुणगणपुण्यसम्भारशालिनः । अत एव धन्यस्य सौभाग्यवतः । प्रियतमस्येति यावत् । नखेन कररुहेण चन्द्रचूडः । अपिरध्याहर्तव्यः । चन्द्र इव चन्द्रः स चूडायामस्येति नखक्षतवानित्यर्थः । चन्द्रशब्दोऽत्र वक्रिमाणं लक्षयन् आह्लादकत्वं व्यनक्ति । चूडाशब्दोऽपि चूचुकसमीपप्रदेशं लक्षयन् शोभोत्कर्षं व्यञ्जयति । भविष्यति अर्थादचिरेणैव । प्रसिद्धचन्द्रचूडोऽप्युक्तविशेषणविशिष्टः । एवं चैतादृशगुणविशेषविशिष्टस्य त्वत्पयोधरस्य जलजत्वेऽपि तत्सङ्गपराङ्मुखे अहिमकरकरसापेक्षोदये विरहिजनदुरन्तदुःखप्रदे चन्द्रचूडरूपताविरहिणि कमलकुड्मले क स-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नवोढा यथा ।

हस्ते धृता ऽपि शयने विनिवेशिता ऽपि
क्रोडे कृता ऽपि यतते बहिरेव गन्तुम् ।
जानीमहे नववधूरथ तस्य वश्या
यः पारतं स्थिरयितुं क्षमते करेण ॥ ७ ॥

मतेति भावः । अत्र श्लेषेणाऽनुगतः पयोधरस्योपमेयस्य उपमाननिष्ठचन्द्रचूडताधर्मेणाऽसम्बन्धाच्चन्द्रचूडसदृश इति प्रतिबिम्बकरणान्निदर्शनालङ्कारः । तल्लक्षणन्तु ।

असम्बन्धे ऽपि सम्बन्धादुपमानोपमेययोः ।
प्रतिबिम्बक्रिया गम्या यत्र स्यात् सा निदर्शना ॥ इति ।

सच भेदे अभेदलक्षणाऽतिशयोक्त्युपमासङ्कीर्णः । वृत्त्यनुप्रासश्च शब्दालङ्कारः । यद्यप्यस्याद्यपादे नकारमात्रव्यञ्जनसादृश्येपि स्वरभेदेन वर्णसाम्याऽभावान्नाऽनुप्रासस्तथापि स्वरसादृश्यस्याऽनियतत्वेन व्यञ्जनसादृश्येनैवाऽनुप्रास इति सर्वाऽऽलङ्कारिकसंमतत्वान्न किं चिद्दूषणम् । वक्रं वृत्तम् । लक्षणं तूक्तम् ॥ ६ ॥

नवोढामुदाहरति । नवोढा यथेत्यादि । कश्चित्स्वसखायं प्रत्याह । न केवलमञ्चले अपि तु हस्ते करे धृता ऽपि अवलम्बि-

हस्तइति हस्ते । न त्वञ्चले । न केवलं तावन्मात्रं, शयने न तदुपान्ते । न केवलं तावदेव क्रोडे भुजाभ्यन्तरे । तेन निर्गमाऽयोग्यत्वम् । बहिः स्वापसदनात् । यतते इति लटा तदविरामो ध्वन्यते । लज्जाभयाधिक्येन विश्वासलेशाऽभावः । करेण तदेकदेशाङ्गुल्यादिना भूतलादौ स्थिरयितुमित्यर्थः ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तापि । न केवलमेतावन्मात्रमपि तु तल्पे शयनीये न तु तदन्तिके । तत्रापि न केवलं निवेशिता अपि तु विनिवेशिता स्थापितापीत्यर्थः । न केवलं तल्पनिवेशनमात्रमपि तु क्रोडे भुजाभ्यन्तरे न तु भुजयोः । एवं च निर्गमाऽयोग्यत्वं द्योत्यते । क्रोडो भुजान्तरमित्यमरः । कृतापि व्यापारितापि नववधूर्नवोढा बहिरेव अर्थात् केलिसदनात् । गन्तुम् । यद्वा गन्तुमेव बहिरपि न स्थातुमित्यर्थः । यतते प्रयत्नं कुरुते । लटा सर्वथाप्रयत्नविरामाऽभावोपि द्योत्यते । लज्जाभयपराधीनत्वात् नास्या विश्वास इति भावः । यद्यप्येवं तथापि यः अनिर्वचनीयगुणगणः कश्चन कृती पारतम् पिपर्ति पारं तनोतीति वा तम् । चपलमित्यर्थः । चपलो रसः सूतश्च पारत इत्यमरः । करेण करैकदेशेनाऽङ्गुल्यादिना स्थिरयितुम् । अर्थाद्भूतले स्थिरीकर्तुं क्षमते दक्षो भवति तस्यैव । प्राक्तन एवकारोऽत्रापि सम्बध्यते । वश्या आक्रमणीया भवति । इति वयं जानीमहे प्रतीमः । एवं च चपलस्यैतादृशस्थिरीकरणमसम्भवि यथा तथा नवोढाया अपि तदिति भावः । अत्रोपमानोपमेयसमानधर्माणां बिम्बप्रतिबिम्बतया निर्देशात्साधर्म्येण दृष्टान्तालङ्कारः । "दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बन"मिति तल्लक्षणात् । स च स्वभावोक्त्यनुगतः । वसन्ततिलकावृत्तम् ।

कर्णस्फुरत्कनककुण्डलमण्डिता या
भावान्विता चरणसङ्गतनूपुरश्रीः ।
गन्धान्विता सुरसना वलयावनद्धा
कान्ता वसन्ततिलका मुदमातनोति ॥ इति लक्षणात् ॥७॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Arya Samaj Foundation Chennai and eGangotri

विश्रब्धनवोढा यथा ।

दरमुकुलितनेत्रपालि नीवी
नियमितबाहु कृतोरुयुग्मबन्धम् ।
करकलितकुचस्थलं नवोढा
स्वपिति समीपमुपेत्य कस्य यूनः ॥ ८ ॥

विश्रब्धनवोढामुदाहरति । दरमुकुलितेति । का चित्कां चित्प्रत्याह । दरमीषत् । ईषदर्थे दरो ऽव्ययमिति विश्वः । मुकुलिते मुकुलीभावं प्राप्ते । लज्जयेति भावः । नेत्रपाल्यौ यत्र क्रियायां तथा दरमुकुलितनेत्रपालि । पालिरिति स्त्रीलिङ्गनिर्देशेन लज्जायामौचित्यमावेद्यते ।

मनागञ्चितपक्ष्माग्रा त्रपात्रस्तकनीनिका ।
संत्रस्तोर्ध्वपुटा दृष्टिर्लज्जिता लज्जितस्त्रियः ॥

इति लक्षणादियं लज्जिता दृष्टिः । यत्तु दरेण भयेनेति व्याख्याय त्रस्ता दृष्टिरियमिति मतं तत्

त्रासनिष्क्रान्तमध्या ऽन्तर्विस्तारितपुटा भिया ।
विलोलतारका भीत्या दृष्टिरुक्ता भयान्विता ॥

दरमुकुलितेति । दरमीषत् । मुकुलितत्वं लज्जया । नीवी कटयंशुकग्रन्थिः सैव नीवी मूलधनम् । नारीकटयंशुकग्रन्थौ नीवी मूलधनेपि चेति विश्वः । तेनाऽतिसंरक्षणीयत्वम् । नियमितत्वेन दुष्परिहरत्वम् । बन्धपदं दृढत्वव्यञ्जकम् । तेनापि दुष्परिहार्यत्वम् । करेणाऽर्थादपरेण । एकवचनेन तयोर्निरन्तरत्वम् । स्थलपदेन सकलहृत्प्रदेशव्यापकत्वेन पुष्टत्वम् । तस्य कस्य भाग्यशालिनः । ईदृशनवोढास्वाप एव दुर्लभः किं पुनस्तद्रतिलाभ इति भावः ॥ ८ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति तल्लक्षणाऽयोगाद्विगतमेव । 'सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्ये' यत्र तु क्रोधोद्रेकोद्धतरुद्रनेत्रे समुद्भूतवीतिहोत्रदर्शनेनाऽऽकुञ्चितैव दृष्टिः ।

आकुञ्चत्पुटपक्ष्माग्रा सम्यक्कुञ्चत्कनीनिका ।
या दृष्टिः कुञ्चिता सोक्ता तेजोदुष्प्रेक्ष्यवस्तुनि ॥

इति तल्लक्षणात् । तथा नीवीनियमितबाहु । नीव्यां कटयंशुकग्रन्थौ नारीकटयंशुकग्रन्थौ नीवी स्यादिति वैजयन्ती । यद्वा नीवीव नीवी । नीवी मूलधनेपि स्यादिति विश्वः । एवं चाऽतिसंरक्षणीयत्वमावेद्यते । तत्र नियमितः अनन्यकर्मतया स्थापितः । एवं च ततस्तस्य दुष्परिहरत्वं ध्वन्यते । बाहुर्यत्र । तथा कृतोरुयुग्मबन्धम् । कृतः सम्पादितः । एवं च बुद्धिपूर्वकत्वं बन्धे ध्वन्यते । उरुयुग्मस्य बन्धः परस्परसंलग्नता । युग्मपदेन साहजिकमाहचर्यं व्यज्यते । बन्धपदं दृढत्वं व्यनक्ति । तेन च दुष्परिहरत्वं ध्वन्यते । तथा करकलितकुचस्थलम् । करेण । एककरस्य कटयंशुकग्रन्थौ नियमितत्वात् अर्थादपरेण । कलितमाच्छादितं कुचस्थलं यत्र । तथा करेणैकवचनेन कुचयोर्निरन्तरत्वं, स्थलपदेन च निखिलहृत्प्रदेशस्याऽऽच्छादितत्वेन कुचयोरतितरामाच्छादितत्वमभिव्यज्यते । नवोढा कस्य चित् अभिनवाऽनेकभाग्यसम्भारवतः । एवं चैतादृशनवोढासान्निध्यस्य दुर्लभत्वमावेद्यते । यूनः नारुण्यशालिनः । समीपमन्तिकमुपेत्याऽऽसाद्य स्वपिति निद्राति । एवं चैतादृशनवोढास्वापमात्रस्य दुर्लभत्वं किमु वाच्यं तद्विलसितस्येति भावः । अत्र स्वभावोक्तिरलङ्कारः । स च युवतीसमीपस्वापस्य पादत्रयार्थहेतुत्वात्काव्यलिङ्गाऽनुप्राणितः । पुष्पिताग्रावृत्तम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Siddhanta eGangotri

समानलज्जामदना मध्या । एषैवाऽतिप्रश्रयादतिविश्रब्धनवोढा । अस्याश्चेष्टा । सागसि प्रेयसि धैर्यं वक्रोक्ति, रधैर्यं परुषवाक् । यथा ।

द्विजवरकररज्जुकर्णपूरौ
प्रथमतृतीयपदौ यदा भवेताम् ।
द्विजपदगुरुरज्जुकर्णयुक्तौ
यदि चरणावपरौ च पुष्पिताग्रा ॥
इति तल्लक्षणाक्रान्तत्वात् ॥ ८ ॥

प्राप्ताऽवसरत्वात् मध्यामुदाहर्तुं तल्लक्षणमाह समानेत्यादि । समानौ समबलतयोपरुद्धपरस्परप्रसरौ लज्जामदनौ यस्याः सा । न्यूनाऽधिकभावशून्यमदनलज्जावत्त्वमिति फलितोऽर्थः । लज्जावत्त्वमात्रस्य मुग्धायामतिप्रसक्तत्वान्मदनवत्त्वं, तद्वत्त्वमात्रं च कुलटायामतस्तदुभयं, तच्च प्रगल्भायामतः समानेति । तत्र च मदनस्याऽधिकत्वान्मध्येति लक्ष्यनिर्देशः । एषैव चाऽतिप्रश्रयादतिविश्रब्धनवोढेति क्वाचित्कः पाठस्तु अतीव धार्ष्ट्याऽभाववत्त्वां तस्यां धार्ष्ट्यप्रयुक्तमध्याव्यवहाराऽसम्भवात् अनुदाहृतत्वाच्चाऽनुपादेयः । वस्तुतस्तु अत्यन्तधार्ष्ट्याऽभाववत्त्वे प्रमाणाऽभावान्न दोषः । लक्षणज्ञानाय चेष्टा-

समानेति । समबलतयोपरुद्धपरस्परत्वं मध्यात्वम् । मुग्धायामतिप्रसङ्गवारणाय लज्जामदनेत्युभयम् । प्रगल्भायामतिव्याप्तिवारणाय समानेति । सा च मदनाधिका । अतिविश्रब्धेति । तस्या धार्ष्ट्याऽभावान्मध्यात्वं चिन्त्यम् । सर्वथा तस्या धार्ष्ट्याभाववत्त्वे प्रमाणाभाव इत्यप्याहुः । आगो ऽपराधः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वापे प्रियाऽऽननविलोकनहानिरेव
स्वापच्युतौ प्रियकरग्रहणप्रसङ्गः ।
इत्थं सरोरुहमुखी परिचिन्तयन्ती
स्वापं पिधातुमपि हातुमपि प्रपेदे ॥ ९ ॥

माह । अस्याश्चेष्टेत्यादि । साऽऽगसि साऽपराधे । आगो ऽपराधो मन्तुश्चेत्यमरः । प्रेयसि प्रियतमे । सतीति शेषः । धैर्ये धैर्यवत्त्वे वक्रोक्तिः श्लेषेण काक्वा वा अर्थान्तरप्रत्यायकं वचनं यस्या इत्यर्थः । वक्रवाक्यप्रबन्धिकेति यावत् । अधैर्ये धैर्याऽभाववत्त्वे परुषा निष्ठुरा वाक् यस्याः सा ।

मध्यामुदाहरति स्वापे इत्यादि । का चित्कां चित्प्रत्याह। स्वापे निद्रायां प्रियाऽऽननविलोकनहानिरेव प्रियस्य न तु पतिमात्रस्य । एवं च विलोकने ऽवश्यकर्त्तव्यत्वं व्यज्यते। आननं वदनं तस्य विलोकनं प्रेक्षणं तस्य हानिरेव नाश एव। एवं चैतत्कालीनप्रियतममुखदर्शनस्याऽग्रे दुष्प्रापत्वं ध्वन्यते। हानिपदेनाऽसहिष्णुत्वमावेद्यते । एवं च मदनरसरभसवशात्प्रियतमवदनाऽवलोकनविघ्नीभूतनिद्राऽवसरे जीवननैष्फल्यं मन्यतइति द्योत्यते । तथा स्वापच्युतौ निद्रात्यागे प्रियकरग्र-

स्वापेति । प्रियस्य न तु पत्युः । तेन विलोकनस्याऽऽवश्यकत्वहानिरेव । तेनैतत्कालिकप्रियाऽऽननदर्शनस्य दुर्लभत्वम् । हानिपदेनाऽसह्यता करग्रहणे इत्यर्थः । प्रियत्वेनाऽनिषेध्यता । तथा च लज्जाहानिरूपाऽनिष्टलाभः । प्रपेदे । अनिष्टद्वयभीतिजन्यसन्तापव्याकुला बभूवेत्यर्थः । एतच्चोदाहरणं त्वन्यत्र द्रष्टव्यम् ॥ ९ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Siddhanta eGangotri

हणप्रसङ्ग एवेत्येवकारो ऽत्रापि योज्यः । प्रियेण करग्रहणं रत्यर्थमिति भावः । अत्रापि प्रियपदमनिषेध्यत्वम्, एवकारश्च कार्यान्तरप्रसराऽभावं व्यञ्जयति । न च प्रियपदद्वयोपादानात् कथितपदत्वं दोष इति वाच्यम् । यथा वदनविलोकनाऽवश्यकर्तव्यत्वे प्रियत्वं प्रयोजकं तथैव करग्रहणाऽनिषेध्यत्वे इति व्यञ्जयितुं तदुभयोपादानात् । 'उदेति सविता ताम्रस्ताम्र एवाऽस्तमेति चे'तिवत् प्रत्युताऽनुगुणत्वम् । तस्य प्रसङ्गः पुनः पुनः कर्तव्यत्वमित्यर्थः । एवं चाऽनिवारणीयत्वं ध्वन्यते । स्वापच्युतिरपि प्रियकरग्रहणप्रसङ्गायैव स्यादित्यर्थः । इत्थं परिचिन्तयन्ती । यदि क्रियेत स्वापस्तदा प्रियतमवदनविलोकनहानिरूपाऽनिष्टमापद्येत, यदि च न क्रियेत तदा प्रियकरग्रहणाऽनिवारणकृतलज्जाहानिरूपाऽनिष्टमापद्येतेत्युभयतस्पाशघात एवेति किमनयोर्ज्ज्याय इति विशेषतः स्वमनस्येव विचारयन्ती सरोरुहमुखी कमलवदना । सरोरुहपदं जडत्वं, तच्च चिन्ताऽतिशयं व्यञ्जयति । स्वापं निद्रां विधातुम् । लज्जात्यागस्य दुष्करत्वादिति भावः । हातुं त्यक्तुमपि । प्रियवदनविलोकनहानेरसह्यत्वादिति भावः । प्रपेदे । अनिष्टद्वयसम्पातभीतिव्याकुला बभूवेत्यर्थः । अत्र च विधानहानाभ्यां तुल्यबलतया लज्जामदनसाम्यवर्णनेन स्फुटैव लक्षणोदाहरणयोः सङ्गतिः । अत्र च हानविधानयोरन्यतरनिश्चयाऽभावेन सन्देहालङ्कारः । स च स्वापतत्यागयोर्विधेयत्वेनाऽनिष्टसम्भावनया तन्निषेध इत्येवं विधेरुक्तत्वे निषेधस्याऽस्फुटत्वे गूढाक्षेपाऽनुप्राणित उपमयापि संसृज्यते । उक्तञ्च । "गूढाक्षेपो विधौ व्यक्ते निषेधे चाऽस्फुटे सती"ति । वसन्ततिलकावृत्तम् । लक्षणं तूक्तम् ॥ ९ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पतिमात्रविषयककेलिकलापकोविदा प्रगल्भा । वेश्यायां कुलटायां पतिमात्रविषयत्वाऽभावान्न तत्राऽतिव्याप्तिः । अस्याश्चेष्टा रतिप्रीतिरानन्दात्संमोहः ।

लब्धावसरत्वात् प्रगल्भामुदाहर्तुं तल्लक्षणमाह । पतिमात्रेत्यादि । पत्यतिरिक्तकेलिकलाप्रावीण्याऽभावत्वे सति पतिकेलिकलाप्रावीण्यमित्यर्थः । पतिमात्रपदयोः क्रमेण कृत्यमाह । वेश्यायामित्यादि । कुलटापदं परकीयालक्षकम् । अस्याश्चेष्टाप्रदर्शनमुखेन भेदमाह । अस्यास्त्विति । भेदद्वयमित्यध्याहारः । तदेवाह रतिप्रीतिरानन्दात्संमोह इति । रतौ सम्भोगे प्रीतिः इतरापेक्षया यस्या इत्यर्थः । आनन्दात्सुखात्संमोहो ऽज्ञता तद्वतीत्यध्याहारः । एवं चैतदन्यतरविशेषितं प्राक्तनलक्षणमेव द्वयोर्लक्षणं वेदितव्यम् । ननु यथा मुग्धासामान्योदाहरणमुक्त्वा तद्भेदप्रदर्शनं कृतं तथा ऽत्राकरणाद्रीतिविरोध इति चेत् । न ह्ययं नियमः । अत एव परकीयायाः सामान्योदाहरणमनुक्त्वापि विशेषोदाहरणम् । यत्तु प्रगल्भायाश्चेष्टामाह अस्यास्त्विति व्याख्यानम् । तन्न । प्रथमा यथेत्यादिग्रन्थाऽस्वरसात् । चेष्टाभेदाद् भिन्नोदाहरणप्रदर्शने भर्तुः शु-

पतिमात्रेति । इदं विशेषणं स्वीयात्वसामान्यलक्षणलब्धमेवाऽनूद्यते । तस्य कृत्यमाह वेश्यायामिति । वेश्यायां सामान्यवनितायाम् । कुलटायां, परकीयोपलक्षकमेतदित्याहुः । रतौ भोगे प्रीतिर्मुग्धापेक्षया ऽधिकेत्यर्थः । संमोहो ऽज्ञानम् । अस्यास्त्वित्यस्य भेदद्वयमिति शेषः । तथा च प्रगल्भा द्विविधा रतिमती आनन्दसंमोहवती चेत्यर्थः । चेष्टापरतया योजनं तु प्रथमा यथेत्यादिग्रन्थस्वरसविरुद्धम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमा यथा ।

संस्पृश्य स्तनमाकलय्य वदनं संश्लिष्य कण्ठस्थलं
निष्पीयाऽधरबिम्बमम्बरमपाकृष्य व्युदस्याऽलकम् ।

श्रूपेत्यादावपि तद्वत्त्वनिबन्धनभिन्नोदाहरणप्रदर्शनापत्तेश्च ।

आद्यामुदाहरति संस्पृश्येत्यादि । स्तनं संस्पृश्य । अत्यन्तं स्तनमर्दनं विधायेत्यर्थः । स्तनमित्येकवचनं पीनताऽतिशयं व्यनक्ति । वदनमाकलय्य स्वमुखेन चुम्बनार्थं संयोज्येत्यर्थः । आकलय्येति पदं प्रीत्यतिशयमावेदयति । कण्ठस्थलं कण्ठप्रदेशं सम्यगालिङ्ग्य । एवं च गाढालिङ्गनता व्यज्यते । तद्व्यतिरेकेण तस्याऽसम्भवात् । आलिङ्गनं चैतद्दुग्धजलाऽभिधानम् ।

अङ्के स्थिता च शयने मृगशावकाक्षी
गात्रे प्रियस्य विशतीव निजाऽन्तरङ्गात् ।
गाढोपगूहनवशेन निरन्तरं यत्
संश्लेषमाहुरिह दुग्धजलाऽभिधानम् ॥

इति तल्लक्षणात् । यद्वा जघनोपश्लेषाख्यमेतत् । उक्तं च

उरुकलिततदीयश्रोणिरस्योपरिष्टाद्
व्रजति यदिह नारी स्रक्सुकेशोत्तरीया ।
करजदशनकृत्यं चुम्बनं वा विधित्सुः
कथयति जघनोपश्लेषमेतन्मुनीन्द्रः ॥ इति ।

संस्पृश्येति । अतिशयेनाऽवमृद्येत्यर्थः । स्तनमित्येकवचनेन पीनताऽतिशयो नैरन्तर्यञ्च । आकलय्य स्वमुखेन चुम्बनार्थं संयोज्य । अम्बराकर्षणे निश्चलतया लज्जाविरहः । तेन रतिप्रीतिर्व्यज्यते । व्युदस्य उत्क्षिप्य । एवं बाह्यरतेन नायिकामुत्कण्ठितां कृत्वा आन्तर-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवस्याऽम्बुजिनीपतेः समुदयं जिज्ञासमाने प्रिये
वामाक्षी वसनाऽञ्चलैः श्रवणयोर्नीलोत्पलं निह्नुते॥ १०॥

अधरबिम्बम् । अधरो बिम्बमेवेति रूपकम् । अधरपदं कोमलतां व्यनक्ति । बिम्बपदमारक्ततां व्यनक्ति । यद्वा अधरमपकृष्टं बिम्बम् । अर्थात्सुधाकरस्य । एवं चाऽधरे सुधाऽधिकरसवत्त्वमावेद्यते । निपीय पानं विधायेत्यर्थः । निपीयेति पीङ् पानइत्यस्य ल्यपि । पिबतेस्तु न । न ल्यपीतीत्वनिषेधात् । निरा चुम्बनबाहुल्यं व्यज्यते । अम्बरं परिधानीयम् । अम्बरपदं नायिकायां सुधादीधितिदीप्तिच्छटाचमत्कारवत् कान्तिविशेषवत्तामावेदयति । एकवचनं च लज्जाविरहं व्यनक्ति । स च रतिप्रीतिम् । अपाकृष्य परिहृत्य । अलकं केशकलापम् । अलकपदं कमनीयतामावेदयति । एकवचनं बन्धनविशेषम् । व्युदस्य उत्क्षिप्य । एवमान्तररतप्रसङ्गे पूर्वाङ्गीभूतबाह्यरतेनाऽऽलिङ्गनादिना नायिकामुत्कण्ठयित्वेत्यर्थः । उक्तं चैतत् ।

रतेः प्रतिबन्धकसूर्योदयं जिज्ञासमाने प्रियइत्याद्यन्वयः । यद्वा । पद्मिन्या रात्रिरतस्याऽऽह्लादकत्वाऽभावेन दिवारतेन तथात्वस्य कामशास्त्रसिद्धत्वेन सूर्योदयं जिज्ञासमाने सति दिवामैथुनं न कुर्यादिति निषेधाद्रतिविरतिं करिष्यतीति भ्रान्त्यां सत्यां नीलोत्पलं नीलकमलं रविप्रकाश्यं निह्नुते गोपयतीत्यर्थः । अत्रोत्पलपदस्य चन्द्रविकाशिन्येव शक्तेः चिन्त्यमेतत् । वस्तुतो नीलोत्पलं नीलकुमुदं वसनाञ्चलैर्निह्नुते गोपयतीत्यर्थः । तेन तन्मुकुलीभावकृतसूर्योदयाऽनुमानशङ्कानिरासः । यद्वा । मुकुलीकरोतीत्यत्र तात्पर्यम् । तेन च सूर्यो नोदित इति ज्ञापयतीत्यर्थ इत्याहुः ॥ १० ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोहनं नाऽऽरभेत्तावद्यावन्नोत्कण्ठिता प्रिया ।
अन्यथा न सुखोत्पत्तिरशीते ऽर्ककरा इव ॥ इति ।

यद्यपि "आदौ रतं बाह्यमिह प्रयोज्यं तत्रापि चालिङ्गनमेव पूर्व"मिति आलिङ्गनस्य पूर्वकालीनत्वाभिधानादत्र तदभावात्कामशास्त्रविरोधस्तथापि तथैव योजनया स परिहरणीयः । अम्बुजिनीपतेः देवस्य सूर्य्यस्य समुदयं सम्यक्तया प्राकट्यम् । "न दिवा मैथुनं कुर्या"दिति रीत्या रतेरन्तरायभूतमिति भावः । प्रिये वल्लभे जिज्ञासमाने ज्ञातुं कृतोद्योगे सतीत्यर्थः । ज्ञाश्रुस्मृदृशां सन इत्यात्मनेपदम् । वामे सुन्दरे अक्षिणी यस्याः सा नायिका वसनाञ्चलैः वस्त्रप्रान्तैः श्रवणयोः कर्णयोस्तत्सम्बन्धीत्यर्थः । नीलोत्पलं नीलकमलम् । सूर्योदयविकासित्वात्तस्येति भावः । निह्नुते स्थगयतीति प्राञ्चः । वयं तु देवस्य क्रीडारसिकस्याऽम्बुजिनीपतेः कमलिनीनायकस्य समुदयं दिवारात्रिविभागज्ञापकमित्यर्थः । प्रिये प्रियरतिदातृत्वादिति भावः । जिज्ञासमाने सति ।

रजनीसुरतेषु पद्मिनी न सुखं याति निसर्गतः क्व चित् ।
दिवसे शिशुयोगतोपि सा विकसत्यम्बुजिनी यथा रवेः ॥

इत्यादिकामतन्त्रोक्त्या पद्मिनीनायिकायास्त्वत्यन्तं दिवसीयसुरतस्य सुखाऽतिशयप्रतिपादनाद्रात्रिशेषे बाह्यरतं विधायाऽऽन्तररतार्थं कामतन्त्रनिपुणे प्रिये दिवसज्ञानाय सूर्योदयं ज्ञातुमिच्छति सतीत्यर्थः । वामाक्षी वामे वक्रे अक्षिणी यस्याः सा । वामं सव्ये प्रतीपे चेति विश्वः । श्रुतिगतविकसत्कमलदिदृक्षयेति भावः । वसनाञ्चलैः । अञ्चलैरिति बहुत्वोक्त्या विकासरभसतया बहुप्रयत्नेन तत्सङ्गोपनमावेद्यते । श्रवणयोः कर्णयोः तत्सम्बन्धीत्यर्थः । द्विवचनेन पर्यायेणोभयभूषण-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीया यथा ।

नखक्षतमुरःस्थले ऽधरतले रदस्य व्रणं
च्युता बकुलमालिका विगलिता च मुक्तावलिः ।

स्वप्रतिपादनात्प्रियत्वम् । तेन स्वसन्निहितवर्त्तित्वमुत्पले व्यज्यते । नीलोत्पलं नीलकमलम् । पाण्डुगण्डतटे तद्वतंसस्यैव शोभोत्कर्षजनकत्वान्नीलोक्तिः । निह्नुते स्थगयति । कमलविकसनेन सूर्योदयं प्रियतमो मा जानात्विति धियेति भावः । एवं च दिवसज्ञाने सत्ययं रतिविरतिं करिष्यतीति भ्रान्त्या दिवसज्ञापककमलविकसनस्थगनमकरोदिति रतिप्रीतिमत्ता ध्वन्यते । यद्वा वसनाञ्चलैर्नीलोत्पलं निह्नुते नास्तीत्यपलपतीत्यर्थः । अपलापस्तु निह्नव इत्यमरः । अथ वा नैतन्नीलोत्पलं किं तु मदक्षिकटाक्षसम्बद्धा वसनच्छटेत्यपलपतीत्यर्थः । एवं च नीलपदमप्यर्थवत् । अत एव वामाक्षीति सहृदयम् । उत्पलस्याऽनेकदलवत्त्वादञ्चलैरिति बहुत्वोक्तिः । अत्रापि पूर्ववदेव व्यङ्ग्यमिति ब्रूमः ।

अत्रोदयेप्यतथ्यस्याऽनुदयस्याऽऽरोपणायोदयज्ञापकस्य तस्य कमलविकासस्य गोपनेनाऽपलापेन वा अपास्त्या ऽपह्नुतिरलङ्कारः । "अतथ्यमारोपयितुं तथ्याऽपास्तिरपह्नुति"रिति तल्लक्षणात् । स च रूपकाऽनुप्राणितः । "तद्रूपकमभेदो य उपमानोपमेययो"रिति तल्लक्षणात् । शार्दूलविक्रीडितं वृत्तम् । लक्षणं तूक्तम् ॥ १० ॥

नखक्षतेति । रतान्तसमये रतान्तोत्तरसमये । रतान्तः सम्यगितो जातोयस्मिन्निति व्युत्पत्तेः । मयेत्यनेन ममेदृशी गतिर्भवतीनां

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रतान्तसमये मया सकलमेतदालोकितं
स्मृतिः क्व च रतिः क्व च क्व च तवालि शिक्षाविधिः ॥ ११ ॥

आनन्दसंमोहवतीमुदाहरति नखक्षतेति । काचिन्नायिका कृतशिक्षाविशेषां सखीं प्रत्याह हे आलि सखि । आलिः सखी वयस्या चेत्यमरः । एवं च रहस्यवार्ताकथनयोग्यता ध्वन्यते । उरःस्थले । एवं च किमु वाच्यं कुचयोरिति भावः । नखक्षतं, क्षतपदेन यत्र पीडाजनकमपि न ज्ञातं तत्र का वार्ता ऽन्यस्येत्यानन्दसंमोहो व्यज्यते । एकवचनेन वैचित्र्यं तेन च रतेरतिशयशालित्वं द्योत्यते । अधरतले अधराधःप्रदेशे । तलं स्वरूपाऽधरयोरिति विश्वः । उपरिभागादधोभागस्य किञ्चित् काठिन्यादायासदत्तं दन्तक्षतं व्यथाकरमपि नाऽवगतमिति तलपदेनावेद्यते । "उच्छूनकं स्यादधराऽवखण्डे ज्ञेयं दृढापीडनतस्तदेवे"ति लक्षणादुच्छूनकाख्यं दन्तपदमेतत् । अधरदले इति पाठे दलपदं कोमलत्वं लक्षयत् पीडाविशेषयोग्यत्वं ध्वनयति । एवं च कोमले व्रणस्याऽतिदुःखदत्वेपि तदज्ञानादानन्दसंमोह एवाऽभिव्यज्यते । रदस्य दशनस्य । रदपदेन काठिन्यं तेन

तु न जाने इतीतरनायिकापेक्षया स्वस्मिन्व्यतिरेको व्यज्यते । तदपि दृष्टमेव सामान्यतो न त्विदमिति विशिष्य ज्ञातमिति भावः । एवं च सति स्मृतिः क्व अभ्यस्तरतवैचित्र्यस्येति शेषः । प्रियतमदर्शनजनितानन्देनेति भावः । रतिः क्व चेति । रतिर्नखक्षतादिरूपा बाह्यरतिः तदव्यवहिताऽऽन्तररतप्रसङ्गे क्व सापि विस्मृतेति । एवञ्चाऽऽलि तव शिक्षाविधेर्दूरापास्तं स्मरणमिति भावः । के चित्तु यदुक्तं रतिसमये इदं न दृष्टमिति तदेवोपपादयति रतिः क्वेत्यादिना, स्मृतिरत्योर्विरोधादिति भाव इत्याहुः ॥ ११ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

च पीडाऽतिशयजनकत्वं गम्यते । अत्रापि संमोहः पूर्ववदेव व्यङ्ग्यः । षष्ठी रतनिवृत्तावपि आद्यपीडातुल्यपीडाप्रदत्वं व्यनक्ति । अत्रापि पूर्ववदेव व्यङ्ग्यम् । वकुलमालिका च्युता । एवं च रतेरनेकप्रकारत्वं व्यज्यते । मुक्तावलिः मुक्ताहारः । विगलिता त्रुटिता । एवं च दृढालिङ्गनप्रदर्शनात्तदेवाऽभिव्यज्यते । एतच्च नखक्षतादि सकलं नैकमपि पूर्वं ज्ञातमिति भावः । मया । एवं च स्त्राऽनुभवमीदृशमहं निवेदयामि न जानामि भवादृशीनां गतिमिति ध्वन्यते । तेन चेतरनायिकाभ्यो ऽतिशयः स्वस्मिन्नावेद्यते । अत एव प्राञ्चः

अन्यास्ताः सखि योषितः प्रियतमे सर्वाङ्गलग्नेपि याः
प्रागल्भ्यं प्रथयन्ति मोहनविधावालम्ब्य धैर्यं महत् ।
अस्माकं तु तदीयपाणिकमलेप्युन्मोचयत्संशुकं
कोयं का वयमत्र किं नु सुरतं स्वल्पापि मे न स्मृतिः ॥

इति वर्णितवन्तो रतिप्रीतिमतीम् । रतान्तसमये सुरताऽवसानकाले न तु सुरतान्ते आलोकितं दृष्टमित्यर्थः । एवं चेदमित्थमिति न विशिष्टपरिचितमिति भावः । तथा सति तत्र स्मृतिः स्मरणसामान्यं क्व च रतिः रतिस्मरणमित्यर्थः । क्व च इत्यपरं तव शिक्षायाः अर्थाद्रतिविशेषस्य विधिः कर्तव्यमित्यर्थः । क्व च क्वापीत्यर्थः । एवं च तदङ्गसङ्गमात्रादेव मम स्मरणसामान्यमपयातं किं पुनर्विदितस्मरणं, किमु वा रतिविशेषविषयकत्वदीयशिक्षास्मरणमिति भावः । इति स्मृतिः क्व च रतिरित्यादेर्व्याख्यानमपव्याख्यानम् । 'क्व चित्ताम्बूलाक्तः क्व चिदगरुपङ्काङ्कमलिनः क्व चिच्चूर्णोद्गारी क्व चिदपि च साऽलक्तकपद' इत्यादिप्राचीनोदाहृते प्रागल्भ्यप्रयुक्तसुरतवैचित्र्यकोविदत्वप्रदर्शनाऽनुपपत्तेः । तस्मादेवमत्राऽभिप्रायः । प्रियतमदर्शनसमये

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्याप्रगल्भे प्रत्येकं मानाऽवस्थायां त्रिविधे । धीरा, अधीरा, धीराऽधीरा चेति । व्यङ्ग्यकोपप्रकाशा धीरा । अव्यङ्ग्यकोपप्रकाशा अधीरा । व्यङ्ग्याऽव्यङ्ग्यकोपप्र-

एव सञ्जातनवीनाऽनेकविधरतिरीतिस्फूर्तिवशान्मया यत्राऽभ्यस्तरतवैचित्र्यं विस्मृतं तत्तदीयाऽङ्गसङ्गजनिताऽऽनन्दनिर्भरतया जायमानदुःसहनखक्षतादिरूपबाह्यरतमपि तदव्यवहिताऽऽन्तररतप्रसङ्गे विस्मृतं, क्व तत्र सुरतजन्याऽऽनन्दप्रतिबन्धकत्वदीयमानधारणाद्युपदेशस्मरणमिति भावः । अत एव लोकेपि रणाङ्गणे युद्धरसिकः कश्चिद्विस्मृताऽभ्यस्तपुत्रमित्रसङ्गतिसुखो ऽज्ञातव्रणवेदनाभूषादिभ्रंशो युद्धे प्रतिभटदलनाऽनुकूलशस्त्राऽस्त्रप्रहरणादिकमेव स्मरति न तु समयविशेषे देशविशेषे सामाद्युपायाऽसम्भवे योद्धव्यमिति नीतिनिपुणोपदेशमित्यलं पल्लवितेन । स्वभावोक्तिरलङ्कारः । तल्लक्षणं तूक्तम् । पृथ्वीवृत्तम् ॥ ११ ॥

लब्धावसरत्वान्मध्याप्रगल्भे भेदान्तरैरनेकविधे इत्याह । मध्याप्रगल्भे इति । मानाऽवस्थायां मानस्य वक्ष्यमाणलक्षणस्याऽवस्थायाम् । तत्प्रधानत्वेन प्रत्येकं त्रिविधे । मध्याप्रगल्भापि त्रिप्रकारेत्यर्थः । तानेव प्रकारानाह धीरेत्यादि । धैर्यवती धीरा । अधैर्यवती अधीरा । धैर्याऽधैर्यवती धीराऽधीरा इत्यर्थः । ननु धैर्याऽधैर्ययोर्विरोधादेकत्र युगपदवृत्तित्वात्कथं तद्व्यपदेश इति चेन्न ।

धीराऽधीरेति । एकत्र धैर्याऽधैर्यकार्यदर्शनेन धीरत्वाऽधीरत्वे विरुद्धे इति न शङ्क्यम् । अत्र स्वीयामध्यालक्षणघटितव्यङ्ग्यमात्रक्रोधप्रादुर्भाववत्त्वं मध्याधीरात्वम् । एवमुत्तरत्रापि । अव्यङ्ग्यः स्फुटः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

काशा धीराऽधीरा । इयांस्तु विशेषः । मध्याधीरायाः कोपस्य गीर्व्यञ्जिका । अधीरायाः परुषवाक् । धीराऽधीरायाश्च वचनरुदिते कोपस्य प्रकाशके । प्रौढाधी-

बाले नाथ विमुञ्च मानिनि रुषं कोपान्मया किं कृतं
खेदो ऽस्मासु न मे ऽपराध्यति भवान् सर्वे ऽपराधा मयि ।
तत्किं रोदिषि गद्गदेन वचसा कस्याऽग्रतो रुद्यते
नन्वेतन्मम का तवास्मि दयिता नाऽस्मीत्यतो रुद्यते ॥

इति प्राचीनोदाहरणादेकत्र वक्रोक्तिमत्त्वादितत्कार्योदय-दर्शनात्तयोरविरोधात् ।

प्रथमोद्दिष्टत्वान्मध्याधीरां लक्षयति व्यङ्ग्येति । व्यङ्ग्यः व्यञ्जनावृत्तिसमधिगम्यः । केन चिल्लिङ्गेनाऽनुमेय इति वा । कोपप्रकाशः । कोपस्य क्रोधस्य । प्रकाशस्य तेजोधर्मत्वात् कोपे बाधात् तत्प्रादुर्भावो ऽत्र लक्ष्यते । तेन च कोपे ऽनौद्धत्यमावेद्यते । तथा च व्यङ्ग्यः कोपप्रकाशः क्रोधप्रादुर्भावो यस्याः सा । एवं च पतिमात्राऽनुरागवत्त्वे सति समानलज्जामदनत्वे सति व्यङ्ग्यमात्रक्रोधप्रादुर्भाववत्त्वविशेषितं मध्याधीरालक्षणमिह बोध्यम् । प्रथमात्सत्सन्तात्परकीयादिव्युदासः । द्वितीयात्प्रगल्भाधीरादिव्युदासः । मात्रपदादधीरादेः । एवमग्रेऽपि । धीरेति लक्ष्यनिर्देशः । व्यञ्जकमेवाह कोपस्येति । गीः शब्द इ-

गीरिति । शब्द इत्यर्थः । इदमुपलक्षणं चेष्टाया अपि । शब्दोऽप्यपरुष एव । अधीरायाः परुषवागित्युक्तेः । अत्र परुषवागित्यस्य कोपप्रकाशिकेति शेषः । इदं रुदितस्याप्युपलक्षणम् । वचनरुदिते वचनमपरुषं वक्रोक्तिरूपम् । रुदितं परुषवचस उपलक्षणम् । प्रौढा-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रायास्तु रतौदास्यम्, अधीरायास्तर्जनताडनादि, धीराऽधीराया रतौदास्यं तर्जनताडनादि च कोपस्य प्रकाशकम् । धीरादिभेदाः स्वीयाया एव न परकीयाया इति प्राचीनलिखनमाज्ञामात्रम् । धीरत्वमधीरत्वं तदुभयं वा माननियतं, परकीयायां मानश्चेत्तदा तासामप्याव-

त्यर्थः । ये तु धीरिति पाठमाहुस्ते धियः परकीयबुद्धेरप्रत्यक्षतया अव्यञ्जकत्वाद् व्यापारविशेषो लक्ष्यतइति व्याचख्युस्ते निष्प्रयोजनकलक्षणाङ्गीकारप्रवणा धीराऽधीरायाश्च वचनरुदिते प्रकाशिके इत्यग्रिमग्रन्थाऽनालोचका वचनं वक्रमित्यर्थ इति तद्व्याचृत्तस्ववचोविरोधभीतिशून्या अतीन्द्रियस्यापि शुद्धमातापितृजत्वादेर्व्यञ्जकत्वमिति शास्त्रसिद्धान्तमजानन्तो नमस्या एव । मध्याम् अधीरां लक्षयति । अधीराया इति । परुषवागिति रुदितस्याप्युपलक्षकम् । तृतीयां लक्षयति धीराऽधीरा इत्यादि । वचनं वक्रोक्तिः । रुदितमिति परुषवचसोप्युपलक्षकम् । लब्धाऽवसरत्वात्प्रौढाधीरादिकं लक्षयति प्रौढाधीराया इत्यादि । अत्र चेष्टाघटितलक्षणप्रदर्शनाच्चेष्टापि प्रदर्शितेति न न्यूनता । प्रसङ्गादाह धीरादिभेदा इत्यादि । आज्ञामात्रं न युक्तिसहमिति भावः । तदेवाह । धीरत्वमित्यादि । माननियतं माननान्तरीयकं, मानव्यापकमिति यावत् । ततः किमित्यत आह । परकीयायां मानश्चेदिति । प-

धीरायास्त्विति । अत्र चेष्टाप्रदर्शनेन तद्घटितं लक्षणमपि दर्शितमेवेति न न्यूनता । धीरादिभेदा इति । इदमुपलक्षणम् । मुग्धामध्यादिभेदा अपि स्वीयाया एवेत्यप्याज्ञामात्रमिति ध्येयम् । दृश्यते हि मालती मुग्धा परकीया चेति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्यकत्वात् । मानश्च स्वकीयाया एव न परकीयाया इति वक्तुमशक्यत्वात् । मध्या धीरा यथा ।

लोलाऽलिपुञ्जे व्रजतो निकुञ्जे
स्फारा बभूवुः श्रमवारिधाराः ।

रकीयायां यदि मानस्तदा धीरात्वादिधर्म्माणामवश्यम्भाव इति भावः । ननु परकीयायां स एव नास्त्यत आह । मानश्चेति । प्रियाऽपराधज्ञानरूपतत्कारणसत्त्वादिति भावः । ननु कन्यकायां यदि मानस्तदा मुग्धायामपि तत्तुल्यतदङ्गीकारस्याऽऽवश्यकत्वात्तन्नान्तरीयकधीरात्वादिभेदानां तस्यां सम्भवात्तदनभिधानान्न्यूनतेति चेद्वयोरवस्थाविशेषाऽघटितलक्षणलक्षितायाः कन्यकायास्तु मानवत्त्वस्य युक्तिसहत्वान्मुग्धायास्तु वयोऽवस्थाविशेषलक्षणलक्षितायास्तदसम्भवात्तन्नान्तरीयकधीरात्वादिभेदानामसम्भवादनभिधानमिति न न्यूनता । वस्तुतस्तु ज्ञातयौवनारूपमुग्धाभेदस्यैते भेदा भवितुमर्हन्तीति तदनभिधानान्न्यूनतैव ।

प्रथमं लक्षितत्वात्प्रथमतो मध्याधीरामुदाहरति । लोलाऽलिपुञ्जइति । का चिन्नायिका साऽऽगसं प्रेयांसमभि-

लोलाऽलीति । भवदङ्गसौरभलोभेन चपलाऽलिसमूहयुते । यद्वा त्वदागमनकाङ्क्षया चपलः आलीनां त्वन्नायिकासखीनां त्वत्सखीनामेव वा समूहो यस्मिन् । तेनाऽतित्वरितगमनात् श्रमाऽतिशयः । नायकसम्बोधनाऽकरणेन कोपाऽतिशयः । निकुञ्जे लतापिहितप्रदेशे । तेन जनाऽनवलोकनीयतया निःशङ्कबहलकेलिविधानात् स्वेदातिश-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

देहे समीहे भवतो विधातुं
धीरं समीरं नलिनीदलेन ॥ १२ ॥

दधाति । लोलाऽलिपुञ्जे लोलाश्चपलाः भवद्वङ्गसौरभलोलुपतयेति भावः । लोलश्चलसतृष्णयोरिति विश्वः । अलिपुञ्जाः भ्रमरसमूहाः यत्र । अत्र सम्बुद्धिपदाऽनुपादानान्नायिकायाः कोपवत्त्वमावेद्यते । यद्वा लोलेति सम्बुद्धिः । हे चञ्चल सतृष्ण इत्यर्थः । एवं चञ्चलस्वभावस्य एतादृगनुचितकार्यकारित्वं गुणाऽनभिज्ञत्वं च तवेति द्योत्यते । अलीनां पुञ्जा यत्र पुञ्जपदेन नैबिड्यमलिषु, सप्तम्या चाऽलिपुञ्जवियोगाऽभावो निकुञ्जे ध्वन्यते । यद्वा आलिपुञ्जे आलीनां सखीनां विरोधिलक्षणया असंखीनां सपत्नीनां पुञ्जो यत्रेत्यर्थः । अथवा अलीनां पुञ्ज इति अलिपुञ्जः तस्मिन् । ध्वान्तराशिरूपे इत्यर्थः । एवञ्चाऽन्यजनाऽनवलोकनीयतया निःशङ्कबहुलकेलिविधानात् खेदाऽतिशयो व्यज्यते । निकुञ्जे लतापिहितप्रदेशे व्रजतः तन्निवारणपुरःसरं वेगेन गच्छतः । अत एव स्फाराः बहुलाः श्रमवारिधाराः श्रमेणाऽऽयासेन वारिधाराः स्वेदधाराः बभूवुः सम्पन्नाः । अतो भवतः तव । एकवचनेनाऽनादरो ध्वन्यते । देहे शरीरे । नलिनीदलेन कमलिनीपत्रेण । तस्याऽतिशीतलत्वादिति भावः । धीरं तत्परिहारसमर्थं स-

यः । भवत इत्येकवचनेनाऽनादरः । देहे तस्य पराधीनत्वेन निरपराधत्वात् । न तु त्वयि । नलिनीदलेन, शीतलत्वात् । तालेन व्यजनेन वेति नोक्तम् । जारवृत्तान्तवतो नायिकासम्बन्धिपदार्थदानस्यैवोचितत्वात् ॥ १२ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मीरं मन्दमिति वा । सम्यगीरयतीति समीरो वायुस्तम् । एवं चैतत्समये एतस्यैव युक्तत्वमिति भावः । विधातुं कर्त्तुम् । समीहे व्यापारयामि । अत्र लोलालिपुञ्जइति विशेषणोपादानात् नायकविलोकनविलोलविलोचननायिकासमूहवत्त्वं ध्वन्यते । तेन चाऽऽकर्षकत्वमावेद्यते । एवं चञ्चलाऽलिबाधाभवननिकुञ्जगमनखेदस्य भवानेव सह इति काकूत्थापिता विलासिनीतादृशनयनाऽऽसक्तस्य तत्समूहकेलिप्रयासेन तव स्वेदोद्गमः सम्पन्नो न तु निकुञ्जगमनेनेति वक्रोक्तिः । यद्वा लोलाऽलिपुञ्जे निकुञ्जइति पदद्वयोपादानाद्भ्रमद्भ्रमरसमूहपक्षलक्षजातवातशीतलतरणिकिरणसरणिशून्यप्रदेशविशेषं व्रजत इति काकोत्थापिता प्रमदाकेलिकलाकलापाविकलतया तव स्वेदधाराः सञ्जाता न तु निकुञ्जगमनेनेति वक्रोक्तिः । तया च साऽपराधत्वप्रकाशनमित्यलङ्कारेण कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नोऽर्थशक्त्युद्भवो वस्तुध्वनिः । न चात्राऽनुपयुज्यमानाऽर्थतया लक्षणामूलध्वनित्वमिति वाच्यम् । लोलाऽलिवारणव्याकुलतया पिहितप्रदेशस्खलद्गत्या अपि स्वेदोद्गमं प्रत्युपयुज्यमानत्वात् । अत्र

श्लोकस्याऽर्द्धे तदर्द्धे वा वर्णाऽऽवृत्तिर्यदि ध्रुवा ।
तदा मता मतिमतां स्फुटाऽनुप्रासता सताम् ॥

इति लक्ष्यलक्षितस्फुटाऽनुप्रासाऽनुप्राणिता वक्रोक्तिरलङ्कारः । "वक्रोक्तिः श्लेषकाकुभ्यां वाच्याऽर्थान्तरकल्पन"-मिति तल्लक्षणात् ।

कर्णो ध्वजौ दण्डमृगेन्द्रहारा
भवन्ति यस्याश्चरणे समस्ते ।
तामिन्द्रवज्रामतिमात्रकान्तां
भोगीन्द्रवक्त्रां भ्रमरं दधानाम् ॥
इति लक्षणात् इन्द्रवज्रावृत्तम् ॥ १२ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Siddhanta eGangotri Foundation, Chennai and eGangotri

मध्या ऽधीरा यथा।

जातस्ते निशि जागरो मम पुनर्नेत्राऽम्बुजे शोणिमा
निष्पीतं भवता मधु प्रविततं व्याघूर्णितं मे मनः।
भ्राम्यद्भृङ्गघने निकुञ्जभवने लब्धं त्वया श्रीफलं
पञ्चेषुः पुनरेष मां हुतवहक्रूरैः शरैः कृन्तति ॥ १३ ॥

मध्यामधीरामुदाहरति जातस्ते इति। का चित्साऽपराधं पतिमाह। अतिचित्रमेतत्, ते तव। एकवचनात्परुषत्वागभिव्यज्यते। अत्रापि सम्बोधनपदाऽनुपादानप्रयोजनं पूर्ववदेव। निशि रात्रौ जागरो निद्राभङ्गो जातः अजनि। कान्तान्तरक्रीडावशादिति भावः। मम पुनर्नेत्राऽम्बुजे नेत्रकमले। अम्बुजपदेन जलजन्यत्वात् तत्सम्बन्धितया रुदितमभिव्यज्यते। एकवचनेन दृशि त्वदागमनमार्गविलोकनप्रवणतया ऽनन्यव्यापारतया एकरूपवत्त्वं तेन चाऽस्यन्ताऽऽसक्तिर्ध्वन्यते। शोणिमा शोणस्य भावः शोणिमा रक्ततेत्यर्थः। यस्य जागरस्तन्नेत्रे एव रक्तत्वमुचितम् इह तु विपरीतमिति चित्रम् इति भावः।

जात इति। जागरः। मदन्यनायिकारतिवशात्। शोणिमा तदसहनजन्याऽमर्षेण। आघूर्णितं भ्रान्तम्। तेनैव श्रीफलं बिल्वफलं तत्सदृशं मदन्यस्याः कुचलक्षणम्। यद्वा श्रियस्तदीययौवनसम्पत्त्यादेः फलं सम्भोगरूपम्। एवञ्च कामनिकेतनायास्तस्याः फलं त्वया गृहीतं तत्कोपेन कामो मां प्रहरतीति चित्रम्। चौरस्यैव ताडनौचित्यादिति भावः। यद्वा मदनस्य कुसुमसायकतया स्वयं फलं लब्ध्वा ऽहं कुसुमैः प्रतारित इति भावः। भ्राम्यद्भृङ्गघने इत्यनेन तस्याऽनेकरागित्वम्। इदमेव च पूर्वोदाहरणे लोलालिपुञ्ज इत्यस्य ॥ १३ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा भवता त्वया प्रविततम् बहु मधु मद्यं निपीतम् । पीतमिति कर्मणि क्तः । घुमास्थेतीत्वम् । अन्यया सहेत्यर्थः । मे पुनर्मनः मम हृदयं व्याघूर्णितम् अतिशयेन भ्रान्तम् । अत्रापि विचित्रार्थः पूर्ववत् । यद्वा प्रविततं महदपि मनः व्याघूर्णितम् । एवं चाऽपराधाऽऽधिक्यमावेद्यते । प्रविततं व्याघूर्णितमित्यपि के चित् । तथा भ्राम्यद्भृङ्गघने भ्राम्यन्तश्चपलाः । वा भ्राशेति श्यन् । शमामष्टानामिति दीर्घः । भृङ्गाः भ्रमराः तैर्घने निबिडे निकुञ्जभवने लतापिहितोदरसदने । त्वया श्रीफलम् बिल्वफलम् । बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपीत्यमरः । श्रीफलस्याऽवयवः फलमित्युत्पन्नस्याऽवयवे च प्राण्योषधिवृक्षेभ्य इत्यणः फले लुगिति लुक् । अत्र भ्राम्यद्भृङ्गघने श्रीफलमिति च वाच्याऽर्थस्य विवक्षिताऽनुपयुज्यमानत्वात्सादृश्यसम्बन्धेन विलोललोचनकामिनीसमूहकुचलक्षणाऽर्थान्तरे संक्रमणादविवक्षितवाच्यो लक्षणामूलो ध्वनिः । उक्तं च ।

अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद्द्वनौ ।

अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ॥ इति ।

एवं च चञ्चललोचनाकुचकलशः प्राप्त इति व्यज्यते । यद्वा श्रियो यौवनादिलक्ष्म्याः फलं तत्सम्भोगादिन लब्धं प्राप्तम् । न तु प्रश्लेषेण श्रीफलं लब्धमित्यपि परुषवचनमभिव्यज्यते । एष पुरोवर्ती । एवं च दुष्परिहरत्वं ध्वन्यते । पञ्चेषुः । पञ्च इषवो ऽस्येति । "अरविन्दमशोकं च चूतं च नवमल्लिका । नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायका" इति । यद्वा मोहनशोषणादय इति । मां पुनः बहुतरमतिशयेन क्रूरैररुन्तुदैः शरैर्बाणैः । एवं च यत्राऽमर्मभेदी अनतिशयेनापि हतो बाणः अबलया सोढुमशक्यः किं पुनरेतादृश इति भावः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्या धीराऽधीरा यथा ।

कान्ताऽनुरागचतुरोसि मनोहरो ऽसि
योग्यो ऽसि किं च नवयौवनभूषितो ऽसि ।

छुन्तति । भिनत्तीत्यर्थः । येन कनककलशादिनिध्याविकं लभ्यते न निवेद्यते च राज्ञे तस्य राज्ञा शरैर्भेदनं क्रियते इह तु त्वया तल्लब्धं मम च शरैर्भेदनमिति वैपरीत्यं चित्रमिति भावः । यद्वा त्वया भ्रमद्भ्रमरयामिककुलसंकुले मदनमहीपतिसदननिकुञ्जे ऽनर्घ्यं फलमपहृतं मां तु क्रूरशरैर्भिनत्ति मदनमहीपतिः । एवं च यस्यैवाऽपराधस्तस्यैव दण्डविधानमिति नीतिरीतित्यागस्तस्येति चित्रमिति भावः । अत्रैकत्र जागरादिकारणाऽकथनेपि नेत्राऽरुणिमादिकार्यकथनादन्यत्र जागरादिकारणकथनेपि कार्याऽकथनात् "क्रियायाः प्रतिषेधेपि फलव्यक्तिर्विभावना" "विशेषोक्तिरखण्डेषु कारणेषु फलाऽत्रच" इति लक्षणलक्षिताभ्यां विभावनाविशेषोक्तिभ्यां प्रागुक्तलक्षणाभ्यां रूपकाऽनुप्रासाभ्यां च संसृष्टो विरोधाऽलङ्कारः । उक्तं च । "विरोधः सो ऽविरोधेपि विरुद्धत्वेन यद्वच" इति । एवं चाऽत्र विरोधाऽलङ्कारेण प्रियाऽपराधप्रकाशलक्षणः कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नवस्तुध्वनिः । शार्दूलविक्रीडितं वृत्तम् ॥ १३ ॥

मध्यां धीराऽधीरामुदाहरति । कान्ताऽनुरागेति । का चित्साऽपराधं प्रत्याह त्वं कान्तानुरागचतुरोसि कान्तायाः कमनी-

कान्ताऽनुरागेति । कान्ताविषयकाऽनुरागोत्पादनचतुरोसि । न तु प्रियाऽनिष्टचतुरोसीत्यादि । यद्वा कान्त न तु प्रिय । अनुरागे जनयितव्ये चतुरोसि । अनुरागवर्ती मामीदृशकार्यकारितया ऽननु-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्थं निगद्य सुदृशा वदने प्रियस्य
निःश्वस्य बाष्पलुलिता निहिता दृगन्ताः ॥ १४ ॥

यरूपत्वेनाऽभिमताया इष्टाया इति यावत् । न तु परिणीतायाः। अनुरागः अनुरञ्जनं तत्र चतुरोसि । यामिच्छाविषयीकरोषि तस्याः स्वस्मिन्नासक्तिविधाननिदानचातुर्यवानसि । यद्वा कान्तायामनुरागस्तत्र चतुरोसि । तस्यां स्वविषयकाऽनुरागहेतुभूतनानाकलाकलापवानसीत्यर्थः । सम्बुद्धिपदाऽनुपादानफलं प्राग्वत् । यद्वा कान्त इति सम्बुद्धिः । हे कान्त न तु प्रियतम। अनुरागस्तत्र चतुरोसि । अनुरागे अर्थाज्जनयितव्ये चतुरो ऽसि। अनुरागवर्ती मामीदृशकार्यकारितया अननुरागवर्ती करोषीति काक्वा वक्रोक्तिः । अथ वा अनुरागविषयकज्ञानवानसि । तथा च स्वविषयकाऽनुरागरहितायामपि तस्यां स्वविषयकाऽनुरागं मन्यमानो ऽनुरागभाग् भवसीति तिर्यग्जातितुल्य इति काक्वा वक्रोक्तिः । न केवलं तदनुरञ्जकं चातुर्यमात्रमपि तु अन्यदपीत्याह । मनोहरोसि । रमणीयोसि । न केवलमेतद् द्वयमेव तदनुरञ्जकम् अपि तु अन्यदपीत्याह योग्योसि। ये एव कान्ताऽनुरागचातुर्यादयो गुणाः

रक्तां करोषि इति काक्वा वक्रोक्तिरियम् । न केवलं तदनुरञ्जकं चातुर्यमात्रं किं त्वन्यदपीत्याह । मनोहर इत्यादि । योग्य इत्यनेनाऽनुरक्तायां मय्यनुरागं न वहसि विपरीतलक्षणया ऽयोग्योसीति परुषवागभिव्यज्यते । नाथोसीति पाठे प्रभुरसि न किं चिद्वक्तुमिति भावः । न तु प्रियो ऽसीति तात्पर्यम् । नवयौवनेति । न तु श्रुतविनयादिभूषितो ऽसि इति तात्पर्यम् । प्रियस्य प्राक् प्रियत्वेनाऽभिमतस्येत्यर्थः ॥ १४ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रौढा धीरा यथा ।

नो तल्पं भजसे न जल्पसि सुधाधाराऽनुकारा गिरो
दृक्पातं कुरुषे न वा परिजने कोपप्रकाशच्छलात् ।
इत्थं केतकगर्भगौरि दयिते कोपस्य सङ्गोपनं
तत्स्यादेव न चेत्पुनः सहचरी कुर्वीत साचि स्मितम्॥ १५॥

तस्याः ते त्वय्यपीति समगुणतया तद्योग्योसि । त्वमयोग्योसीति वक्रोक्तिः । अनुरागवत्यपि मादृशे जने ऽनुरागाऽभावमाहसीति काक्वा परुषवागभिव्यज्यते । नाथोसीति पाठे प्रभुरसीत्यर्थः । तया चाऽनुचितकार्यकारित्वेप्यवर्जनीयत्वं द्योत्यते । न केवलमेतान्येव तद्योग्यत्वे प्रयोजकानि अपि तु अन्यदपीत्याह । किं च नवयौवनभूषितोसि नवयौवनेनाऽभिनवोन्मादशालिवयोवस्थाविशेषेण भूषितोसि अलंकृतोसि । केवलं यौवनमेव तत्राऽलङ्कारकं न श्रुतविनयादीति वक्रोक्तिः । सुदृशा नायिकया । इत्थम् एवंप्रकारेणोक्त्वा निःश्वस्य निःश्वासमुत्सृज्य । दुःखोद्रेकवशादनिवारणीयत्वाच्चेति भावः । प्रियस्य भर्त्तुर्वदने बाष्पलुलिताः पूर्णबाष्पाः दृगन्ताः दृक्प्रान्ताः निहिताः प्रेरिताः वसन्ततिलकावृत्तम् । अत्रापि पूर्वश्लोकवद्ध्वनिरवगन्तव्यः । उक्तलक्षणाऽनुप्रासाऽनुप्राणितो वक्रोक्तिरलङ्कारः । लक्षणं तूक्तम् । एतेषूदाहरणेषु मध्यात्वसङ्गतिश्चिन्त्या ॥ १४ ॥

कान्तो नायिकामाह नो तल्पमिति । परिजनक्रोधप्रकाशच्छलादिति सर्वत्राऽन्वेति । सर्वक्रियासु इत्थं क्रोधप्रकाशच्छलेन तल्पभजनाऽभावादिभिः । सहचरी सार्वदिकसान्निध्यशालिनी सखी । साचि वक्रीकृतग्रीवम् ॥ १५ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लब्धावसरत्वात्प्रगल्भां धीरामुदाहरति नो तल्पमिति । का चित्सखी नायिकां प्रति वदति हे केतकगर्भगौरि । केतकं केतकीकुसुमं तस्य गर्भः । तस्याऽतिगौरत्वादिति भावः । तस्माद् गौरि ततो ऽधिकतरगौरवर्णशालिनि । गर्भपदेन सखीष्वपि कोपगोपनकारितया दुर्ज्ञेयहृदयत्वमावेद्यते । तल्पं पर्यङ्कं नो भजसे सनाथयसि । न केवलं प्रियतमाऽधिष्ठिततल्पसमीपाऽनवस्थितिः अपि तु दूरतोपि सुधाधाराऽनुकाराः पीयूषसदृशाः । अथ वा सुधायाः आधारः समुद्र इत्यर्थः । तदाकाराः । लसत्सुरसवर्णावलीरित्यर्थः । अथ वा गम्भीराः गिरः वचो न जल्पसि वदसि । एवं च न यत्र संलापोपि तत्र काऽऽलिङ्गनचुम्बनादीति रतौदास्यमावेद्यते । आस्तां संलापः अपि तु तं नावलोकयस्यपीत्याह दृक्पातं नेत्रनिपातनमपि न वा कुरुषे । बुद्धिपुरःसरविलोकनं दूरपराहतमिति भावः । इत्थममुना प्रकारेण दयिते कोपस्य प्रियतमविषयकक्रोधस्य परिजनक्रोधस्य प्रकाशच्छलान्निकटवर्तिस्वजनविषयककोपप्रदर्शनमिषात् । वस्तुगत्या स्वाधीनजने न कोपि कोप इति भावः । प्रकाशस्य तेजोधर्मत्वात् कोपे बाधात् तीव्रत्वं लक्ष्यते । तेन च दुःसहत्वं ध्वन्यते । यत्सङ्गोपनमाच्छादनमपि तस्मिन् वा तत् तदा स्यात् चेद्यदि पुनः सहचरी सह सार्द्धं चरति गच्छति अहर्निशं त्वत्समागमवतीत्यर्थः । यवादिषु चरेष्टित्करणान्ङीप् । अत एव आचरतीति पचादिषु चरेष्टित्वादिति वामनोपि । इत्थं च इयं त्वदीयनिखिलरीतिज्ञेति भावः । एवं चैतस्याः स्मितेन कोपगोपने व्यर्थत्वाऽन्यथात्वनिर्णयो ऽस्माकमिति ध्वन्यते । यत्तु सहचरी सखीत्याहुस्तन्न । सख्याः कथनोत्तरमेव ज्ञानं सहचर्यास्त्वकथने-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Arya Samaj Foundation Chennai and eGangotri

प्रौढा अधीरा यथा ।

प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां
हरशिरसि परस्या वासमाशङ्कमाना ।
गिरिशमचलकन्या तर्जयामास कम्प-
प्रचलवलयचञ्चत्कान्तिभाजा करेण ॥ १६ ॥

पीति तयोर्भेदात् । साचि वक्रं वदनं विवर्त्येत्यर्थः । साचि-पदेन नायकं प्रति नायिकाकोपगोपनकारित्वं द्योत्यते । स्मितं हास्यविशेषम् । एकवचनेनाऽल्पत्वं तेन नायिकातः सहचर्या भीतिरथ वा नायिकाहृद्गतज्ञानसङ्गोपनं व्यज्यते । कुर्वीत वि-दधीत । इत्थमौदास्यशालिन्यास्तव प्रियविहिताऽपराधजनित-कोपस्य अन्यनिमित्तजत्वप्रदर्शनमिषेणाऽऽच्छादनं तदा स्यात् यदि त्वद्रहस्यविज्ञेयं प्रियविषयककोप एव एतस्या नाऽन्य-विषयक इति सूचकं हसितं नाऽकरिष्यत् । एवं चाऽधुना त्वत्प्रियतमेनाप्येतत् ज्ञातम् अतस्त्वत्प्रसादसम्पादनाय स ए-वात्राऽऽयातीत्यनुमोदस्वाऽस्माकमितो गमनायेति भावः । यद्वा दयिते प्रियतमे मयि कोपगोपनं तदा स्यादित्यादि नायको-क्तिरेव । दयितपदं कोपस्यौचित्यं ध्वनयति । के चित्तु द-यिते इति सम्बुद्धिपदं मत्वा नायकोक्तिरियमित्याहुः । शार्दू-लविक्रीडितं वृत्तम् ॥ १५ ॥

प्रतिफलमिति । प्रतिबिम्बमित्यर्थः । अचलकन्यात्वेन जडत्वम् अविचार्यकार्यकारित्वञ्च । कम्पेति । कम्पचञ्चलकङ्कणप्रसर्पत्का-न्तिभाजा करेणेत्यनेन नानाविधमणिमरीचिनिचयभास्वरकङ्कणग-णक्कणवत्करजन्यतया तर्जनस्याऽतिभीतिप्रदत्वम् ॥ १६ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रौढा धीराऽधीरा यथा ।

तल्पोपान्तमुपेयुषि प्रियतमे वक्रीकृतग्रीवया
काकुव्याकुलवाचि साचिहसितस्फूर्जत्कपोलश्रिया ।

प्रौढामधीरामुदाहरति प्रतिफलमिति । हरशिरसि शिवमस्तके इन्दोश्चन्द्रस्य कलायां शकले स्वीयमात्मीयं प्रतिफलं प्रतिबिम्बम् अवलोक्य दृष्ट्वा । न तु विचार्येत्यर्थः । तस्याऽतिस्वच्छत्वादिति भावः । परस्या अन्यस्याः वामं स्थितिम् । न त्वागमनमात्रम् । आशङ्कमाना वितर्कयन्ती । स्वप्रतिबिम्बाऽनभिज्ञेति भावः । अत एव अचलकन्या पर्वतपुत्री पार्वती । यद्वा कन्येव कन्या । एवमविचार्यकारित्वं ध्वन्यते । गिरिशं गिरिं पर्वतं श्यति उपभोगेन तनूकरोतीति गिरिशस्तम् । आतो ऽनुपसर्गे इति कः । गिरिरस्यास्तीति गिरिश इति वा लोमादित्वाच्छः । शिवं कम्पप्रचलवलयचञ्चत्कान्तिभाजा । कम्पेन । कोपावेशादिति भावः । प्रचलानि अतिशयितचाञ्चल्यभाञ्जि यानि वलयानि कङ्कणानि तेषां चञ्चन्त्यः प्रसरन्त्यः । आश्रयचाञ्चल्यादिति भावः । याः कान्तयः नानाविधमणिमरीचयः । तद्राजा तद्युक्तेन करेण हस्तेन तर्जयामास निरभर्त्सयत् । चक्षिङो ङित्त्वेनाऽनुदात्तेत्त्वनिमित्तमात्मनेपदमनित्यमिति तर्जयतेः परस्मैपदम् । नानाविधमणिमरीचिनिचयभास्वरकङ्कणक्वाणवत्करजन्यतया तर्जनस्याऽतिभीतिप्रदत्वं ध्वन्यते । अत्र संशयो भ्रान्तिर्वा ऽलङ्कारः । मालिनीवृत्तम् ॥१६॥

तल्पोपान्तं न तु तल्पमुपेयुषि प्राप्तवति न तूपविष्टे । तेन दूरतो दर्शनेनैव तत्कृताऽपराधस्मृतिर्व्यज्यते । मयीयं कुपितेति भिया व्याकुला झटिति वक्तुमशक्या काकुर्ध्वनिविकारवती वाक् यस्य ता-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हस्तन्यस्तकरे पुनर्मृगदृशा लाक्षारसक्षालित-
प्रोष्ठीपृष्ठमयूखमांसलरुचो विस्फारिता दृष्टयः ॥१७॥

प्रौढा धीराऽधीरामुदाहरति तल्पोपान्तमिति । का चित्सखी नायिकावृत्तान्तं स्वसखीं प्रति वदति । सखीति सम्बुद्धिरध्याहर्तव्या । प्रियतमे अयन्तं प्रेमास्पदे नायके । प्रियतमपदेनाऽवर्जनीयत्वमावेद्यते । तल्पोपान्तम् पर्यङ्कसमीपदेशं न तु पर्यङ्कमुपेयुषि प्राप्नवति सति न तूपविष्टे । एवं च दूरत एव दर्शनसमयएव तत्कृताऽपराधस्मृतिरभिव्यज्यते । वक्रीकृतग्रीवया वक्रीकृता तिर्यग्विहिता ग्रीवा मन्या यया तया । साऽपराधस्याऽस्य शठस्याऽभिमुखमवस्थितिरपि नोचितेति कोपेनेति भावः । तथा प्रियतमे काकुव्याकुलवाचि सति । काकुर्ध्वनिविकारः । यदियम् एतादृशी लक्ष्यते अतो मत्कृताऽपराधज्ञानात्कुपितेति भियेति भावः । अत एव व्याकुला झटिति वक्तुमशक्या । अन्यथावादादिरचनयेति भावः । वाक् यस्य तस्मिन्सतीत्यर्थः । साचिहसितस्फूर्जत्कपोलश्रिया साचि तिर्यग्भूत्वा कथमयं सापराधोपि वाचालतया आत्मानमनपराधिनमिव दर्शयतीति विस्मयेन यद्धसितं न तु तोषेण । अग्रे

दृशि सति साचि तिर्यग्भूत्वा कथमसौ सापराधो ऽपि वाचालतया ऽऽत्मानमनपराधमिव दर्शयतीति विस्मयेन यद्धसितं तेन रोषेण स्फूर्जन्ती अतिशयिता कपोलश्रीर्यस्याः । तथा ततो हासेन प्रसादमनुमाय हस्तन्यस्तकरे सति । प्रोष्ठी शफरी । लाक्षारसक्षालितत्वेनाऽऽरुण्याऽतिशयः । क्षालितं लिप्तमित्यर्थः । अत्र प्रोष्ठीपदेन चञ्चलत्वं कठिनत्वञ्च । पृष्ठपदेन यत्सापराधोपि प्रणामादिमन्तरेणैव करग्रहणं करोतीति अरुणचञ्चलकठिनदृष्टिपातः ॥ १७ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोपाऽऽविष्करणात् । तेन स्फूर्जन्ती अतिशयशालिनी कपोल-योर्गण्डयोः श्रीः शोभा यस्यास्तया । तथा प्रियतमे हस्तन्य-स्तकरे स्वहस्ताऽऽक्षिप्तकरे सति । यदीयं हसितमकरोत्तर्हि प्रसन्नै-वेति भावः । मृगदृशा चपलविशालनेत्रया लाक्षारसक्षालि-तप्रोष्ठीपृष्ठमयूखमांसलरुचः लाक्षारसेनाऽलक्तकेन क्षालितं निर्मलीकृतं लिप्तमिति यावत् । प्रोष्ठीपृष्ठं शफरीपृष्ठम् । प्रो-ष्ठी तु शफरी द्वयोरित्यमरः । तस्य ये मयूखाः किरणास्तद्वन्मां-सलाः । मांसलत्वस्य चेतनधर्मत्वाद् दीप्तिषु बाधादाधिक्यं लक्ष्यते तेन च दुःसहत्वं ध्वन्यते । तथा चाऽधिका इत्यर्थः । सिध्मादिभ्यश्चेति लच् । रुचो दीप्तयो यासां ताः । प्रोष्ठीपृ-ष्ठस्य स्वत एवाऽरुणत्वेपि लाक्षारससंपर्काच्चित्रमन्तारुणत्वं यथा तथा चक्षुषः स्वाभाविकाऽरुणत्वेपि कोपवशादधिकारुणत्व-म् । अथ वा श्वेते ह्यलक्तकदानेनाऽऽरुण्यस्य व्यक्तता यथा तथा सितायां दृष्टौ कोपकृताऽऽरुण्यस्य व्यक्तत्वमिति भावः। प्रोष्ठीपदेन प्रियतमः कृतापराधोप्ययमकस्मादेवाऽस्मत्करग्र-हणं करोति, कुतुकिनीभिरिव भवतीभि स्तूष्णीं स्थीयते कि-मिदमुचितं भवतीनामिति सखीजनमपि पश्यतीति चपलत्वं ध्वन्यते । पृष्ठपदेन कठिनत्वमावेद्यते । दृष्टयः कटाक्षा विस्फा-रिताः प्रसारिताः । एवं च कटाक्षादेर्वैचित्र्यं द्योत्यते । कृता-ऽपराधोप्यसौ निःशङ्ककरग्रहणमकस्मादेव करोतीति कोपेनेति भावः । अत्र तादृग्दृग्रूपवस्तुना प्रियाऽपराधप्रकाशनरूपव-स्तुध्वनिः । लुप्तोपमाऽनुप्रासाऽनुप्राणितः प्रियचेष्टाया वाक्या-र्थं प्रति हेतुत्वात् "काव्यलिङ्गं हेतोर्वाक्यपदार्थते"ति लक्षण-लक्षितः काव्यलिङ्गमलङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥१७॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एते च धीरादिषड्भेदा द्विविधाः। ज्येष्ठा कनिष्ठा च। धीरा ज्येष्ठा कनिष्ठा च। अधीरा ज्येष्ठा कनिष्ठा च। धीराऽधीरा ज्येष्ठा कनिष्ठा च। परिणीतत्वे सति भर्तुरधिकस्नेहा ज्येष्ठा। परिणीतत्वे सति भर्तुर्न्यूनस्नेहा कनिष्ठा। अधिकस्नेहासु न्यूनस्नेहासु परकीयासु सामान्यवनितासु नाऽतिव्याप्तिः। परिणीतपदेन व्यावर्तनात्।

धीरा ज्येष्ठा कनिष्ठा च यथा।

एकस्मिन् शयने सरोरुहदृशोर्विज्ञाय निद्रां तयो-
रेकां पल्लविताऽवगुण्ठनपटामुत्कन्धरो दृष्टवान्।

एवं धीरादिभेदानुक्त्वा संप्रति तेषि प्रकारान्तरेण भिद्यन्तइत्याह एते चेति। षड्भेदाः मध्याप्रौढाविषयत्वेनेत्यर्थः। इदमपि प्राचीनसंप्रदायाऽनुरोधेन। तत्र ज्येष्ठां लक्षयति परिणीतत्वे सतीति। यन्निरूपितपाणिग्रहणजन्यसंस्कारवत्त्वं तन्निरूपितसपत्नीप्रतियोगिकाऽधिकस्नेहवत्त्वमित्यर्थः। कनिष्ठालक्षणमप्येवमूह्यम्। लक्षणद्वये परिणीतपदव्यावर्त्यमाह अधिकस्नेहास्वित्यादि। सामान्यवनितास्विति परकीयाया अप्युपलक्षकम्।

धीराज्येष्ठाकनिष्ठे उदाहरति एकस्मिन्निति। का चित्स-

धीरा ज्येष्ठेत्यादि। इदमपि प्राचीनाऽनुरोधेनैव। अधिकेति। अधिकत्वञ्च सपत्न्यन्तराऽपेक्षया।

एकस्मिन् शयने इति। का चित्सखी सखीं प्रति वदंति हे सखि स दक्षिणनायकः कोपवशात्स्वाऽनपेक्षितत्वेन एकस्मिन् शयने सुप्त-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यस्याः सविधं समेत्य निभृतं व्यालोलहस्ताङ्गुलि-
व्यापारैर्वसनाञ्चलञ्चपलयन् स्वापच्युतिं क्लृप्तवान्॥ १८॥

खी सखीं प्रति वदति । हे सखि स दक्षिणनायकः कोपवशा-
त्स्वाऽनपेक्षितत्वेन सरोरुहदृशोः कमलनयनयोर्नायिकयोः ।
सरोरुहपदेन विशालत्वं दृक्पदेन विवेचकत्वं व्यज्यते । एक-
स्मिन् शयने तल्पे नायककृततुल्याऽपराधतया सञ्जातमैत्रीक-

योर्नायिकयोः नायककृततुल्याऽपराधतया सञ्जातमैत्रीकत्वादिति
भावः । निद्रां विज्ञाय नायकस्य दर्शनं मा भूदिति विधाय पल्लवितः
आपादतलमस्तकं विस्तारितो ऽवगुण्ठनपटः प्रच्छादनपटो यया ता-
मेकाम् । इदमेव कोपचिह्नम् । पल्लवितपदेन तदीयकरस्पर्शाऽसहिष्णु-
त्वम् । तेन च रतावौदासीन्यम् । उत्कन्धरः । उद्ग्रीवः । न तूत्थितः ।
कदा चिदियं द्रक्ष्यतीति भियति भावः । दृष्टवान् तदीयनिद्रानि-
र्णयाय । ततो ऽन्यस्याः निकटं प्राप्य निभृतं गुप्तम् । तदीयोत्तरीय-
वसनोऽन्तरितया व्यालोलाञ्चलिता या हस्ताङ्गुलयो नायककरयो-
गात् अङ्गुलयो न तु हस्तः । कङ्कणझणत्कारेण कनिष्ठायाः स्वापच्यु-
तिर्मा भूदिति धियेत्यर्थः । तासां व्यापारैः पुनः पुनर्नायककर्तृक-
चालनैः । एकव्यापारेण स्वापच्युतावपि नेत्रोन्मीलनं नाऽकरोदिति
पुनः पुनस्तत्करणम् । तेन स्युदासीनत्वं ध्वनितम् । पल्लविताऽवगुण्ठ-
नपटामिति । अस्याः अपि विभक्तिभेदेनेत्याहुः । एवंभूतैस्तदीयहस्ता-
ङ्गुलिव्यापारैस्तदीयवसनप्रान्तं न तु वसनम् । आकस्मिकवसनाक-
र्षणं मा भूदिति चपलयन् शिथिलयन् । न तु कर्षन् । तथा सति
अधिक एव कोपः स्यात् । यद्वा स्त्रीयैरेव हस्ताङ्गुलिव्यापारैस्तद्वस्त्र-
प्रान्तं चपलयन्नित्यर्थः । तथा सति क्लृप्तवान् अकार्षीत् । रिरंस-
येति भावः । एवञ्च क्रीडौत्सुक्याऽभावात् पूर्वार्द्धे स्नेहन्यूनतया
कनिष्ठा । उत्तरार्द्धे क्रीडौत्सुक्याज्जेष्ठात्वम् ॥ १८ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वादिति भावः । निद्रां स्वापं विज्ञाय तयोर्मध्ये एकां पल्लु-
विताऽवगुण्ठनपटां स्वयमेव स्वभावेन यद्वा कृताऽपराधस्य ना-
यकस्य दर्शनं मा भवत्विति बुद्ध्या पल्लवितः आपादतलमस्त-
कविस्तारितः अवगुण्ठनपटः आच्छादनपटो यया ताम् । अ-
वगुण्ठनपदेनाऽऽच्छादकत्वप्रतिपादनद्वारा व्यङ्ग्यकोपप्रका-
शत्वं ध्वन्यते । पल्लवपदेन तदीयकरस्पर्शाऽसहिष्णुत्वमावे-
द्यते । तेन च रताबुदासीनत्वं व्यज्यते । एतद्रीत्या मध्याप्र-
गल्भे अत्र वेदितव्ये । इति पृथगनुदाहरणान्न न्यूनत्वशङ्का ।
उत्कन्धर उद्ग्रीवः न तूत्थितः कदा चिदियं द्रक्ष्यतीति भियेति
भावः । दृष्टवानालोकितवान् । ततो ऽन्यस्याः सविधं निकटं
समेत्य सम्यक् मन्दपदन्यासेनेति भावः । एत्याऽऽगत्य वस-
नाञ्चलं वसनप्रान्तं न तु वासः । आकस्मिकवसनसमाकर्षणे
संभ्रमो भविष्यतीति धियेति भावः । चपलयन् शिथिलयन्न
त्वाकर्षयन् । कुपितायाः वसनाञ्चलाऽऽकर्षणे कदा चिदाधिक एव
कोपः स्यादिति भावः । निभृतं गुप्तं तदीयोत्तरीयवसनान्त-
रिततयेति भावः । व्यालोलाश्चञ्चलाः नायककरयोगादिति
भावः । या हस्तङ्गुलयो न तु हस्तः । अन्यथा कङ्कणरणत्का-
रेण कनिष्ठायाः स्वापच्युतिर्भविष्यतीति धियेति भावः ।
तासां व्यापारैश्चेष्टितैः । बहुवचनेनैकतद्व्यापारेण स्वापच्युता-
वपि न नेत्रोन्मीलनमकरोदिति पुनः पुनस्तत्करणमतो रता-
बुदासीनत्वं ध्वन्यते । स्वापच्छलेनाऽन्तर्गतकोपसङ्गोपनतया
व्यङ्ग्यकोपप्रकाशत्वं व्यज्यते । यद्वा निभृतव्यालोलहस्ताङ्गु-
लिव्यापारैः न तु निभृतचरणाऽङ्गुलिव्यापारैः । एवं च कनि-
ष्ठादर्शनभियोपवेशनं व्यज्यते । विनीतत्वं वा । वसनाञ्चलं
चपलयन्नित्यर्थः । स्वापच्युतिं निद्राभङ्गं क्लृप्तवानकार्षीद् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधीरा ज्येष्ठा कनिष्ठा च यथा ।

अन्तः कोपपकषायिते प्रियतमे पश्यन् घने कानने
पुष्पस्याऽवचयाय नम्रवदनामेकां समायोजयत् ।

रिरंसयेति भावः । अत्र पूर्वार्द्धे क्रीडौत्सुक्याऽभावान्न्यूनस्नेहवत्त्वेन कनिष्ठात्वम् । उत्तरार्द्धे क्रीडौत्सुक्यात्स्नेहाऽऽधिक्येन ज्येष्ठात्वमित्यवगन्तव्यम् । शार्दूलविक्रीडितं वृत्तम् ॥ १८ ॥

अधीराज्येष्ठाकनिष्ठे उदाहरति । अन्तः कोपेति । काचित्सखी स्वसखीं प्राह कोपि चतुरः प्रियतमे नायिके एकस्याः प्रीत्यतिशयाभावात् तमप् अविवक्षितार्थः । वस्तुतो ज्येष्ठातो न्यूनप्रीतिमत्त्वेपि अन्यापेक्षया प्रेमाऽतिशयवत्त्वात् कनिष्ठायामपि न तदर्थबाधः । यद्वा प्रियतमे इति काननविशेषणम् । प्रिये इत्यध्याहारः । कोपकषायिते क्रोधेन कलुषीकृते तत्करोतीति णिजन्तात्कषायशब्दान्निष्ठायां सेटीति णिलोपः । पश्यन् परुषवचनतर्जनताडनात्तयोः कोपं प्रत्यक्षमिवाऽऽकलयन्निस्यर्थः । पुष्पस्येत्येकत्वमविवक्षितम् । अवच-

अन्तरिति । अन्तः कोपकषायिते कलुषीकृते प्रियतमे ज्येष्ठापेक्षया अन्यस्याः प्रियतमत्वाभावे ऽपि नायिकान्तरापेक्षया प्रेमातिशयत्वात् तमप् । यद्वा प्रियतमे इति काननविशेषणं पश्यन् तर्जनताडनाकोपं प्रत्यक्षमिवाऽऽकलयन् । तयोरेकां स्वत एव नायकं प्रति कोपाद्वा पुष्पावचयाय तन्निमेषेण नम्रवदनाम् । घने कानने ऽन्तर्घनकाननमध्ये समायोजयत् प्रसादनादिपूर्वकं प्रैरयत् इत्यर्थः । निबिडवनमध्यप्रविष्टया किमपि स्वचरितं द्रष्टुं न शक्यमिति बुद्ध्येति भावः । ये

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्धोन्मीलितलोचनाञ्चलचमत्काराऽभिरामाऽननां
स्मेराऽर्धाधरपल्लवां नववधूमन्यां समालिङ्गति ॥१९॥

याय ग्रहणाय नम्रवदनाम् अधःकृतमुखीम् । स्वत एवेति भावः । अथ वा नायकं प्रति कोपादिति भावः । घने निबिडे कानने वने । अन्तः अभ्यन्तरे निबिडवनमध्ये इत्यर्थः । आदावेव वनं निबिडं तत्रापि तन्मध्यप्रविष्टया स्वचरितं किमपि न द्रष्टुं शक्यमिति धियेति भावः । के चित् अन्तःकोपकषायिते इत्येकपदतया व्याचख्युस्तन्मते ऽधीरात्वप्रतीतिः कथमिति विभाव्यम् । समायोजयत् । सम्यक्तया प्रसादनपुरस्सरमित्यर्थः । अयोजयत् प्रेरयामास । स्वतः पुष्पाऽवचयाय प्रवृत्तायाः केवलविनयपुरःसरं काननममध्ये भूयान् पुष्पसमुदायस्तत्रैव पुष्पाऽवचयं कुर्विति नियोजयामासेति भावः । एवं च नम्रवदनामित्यस्य न वैयर्थ्यशङ्का । ततः अर्द्धोन्मीलितलोचनाञ्चलचमत्काराऽभिरामाऽननाम् अर्द्धं स्वल्पम् उन्मीलिते ये लोचने नेत्रे तयोर्ये अञ्चलचमत्काराः प्रान्तविभ्रमास्तैरभिरामं स्पृहणीयमाननं वदनं यस्यास्ताम् । अर्द्धमुकुलितेयं दृष्टिः ।

तु अन्तःकोपकषायिते इत्यैकपद्येन व्याचक्षते तेषामधीरत्वप्रतीतिश्चिन्त्या । अर्द्धोन्मीलितनेत्रयोर्ये प्रान्तचलचमत्कारास्तद्विभ्रमास्तै रमणीयवदनवतीम् । कथमियमनेन प्रतारितेति स्मेरः स्मितवानधरार्द्धमर्द्धाधरपल्लवो यस्यास्ताम् । अनेन सलज्जत्वम् । स्मेरार्द्रेति पाठे स्मेरेणार्द्रः तेन स्मितस्य सुधारूपता । यद्वा स्मेरः आर्द्रश्चाऽधरपल्लवो यस्या इत्यर्थः । तत्राऽऽर्द्रपदेन सुधाद्रवरूपत्वमधरे व्यज्यतइत्याहुः॥१९॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धीराऽधीरा ज्येष्ठा कनिष्ठा च यथा ।
धैर्य्याऽधैर्यपरिग्रहग्राहिलयोरेणीदृशोः प्रीतये
रत्नद्वन्द्वमनन्तकान्तिरुचिरं मुष्टिद्वये न्यस्तवान् ।

स्तोकोन्मीलिततारा या मनाक्कुञ्चत्पुटोभया ।
किञ्चिदुत्फुल्लपक्ष्माऽग्रा दृक् सा ऽर्द्धमुकुला मुखे ॥

इति तल्लक्षणात् । स्मेराऽर्धाधरपल्लवाम् अधरस्याऽर्द्धम् अर्धाधरः । अर्द्धं नपुंसकमिति समासः । स एव पल्लव इति रूपकम् । स्मेरः स्मितविकस्वरो ऽर्द्धाधरपल्लवो यस्यास्ताम् । कथमियमनेन प्रतारितेति विस्मयात् स्मितमकरोदिति भावः । कथमियमनभिज्ञा एतत्कृतप्रतारणमपि न जानातीति विस्मयात् स्मितमकरोदिति वा । अथ वा स्मेरम् अर्द्धं यस्य स स्मेरार्द्धः । तथा अधरपल्लवो यस्यास्ताम् इति । स्मेराऽर्द्धपदेन सलज्जत्वमावेद्यते । पल्लवपदेन कोमलत्वमरुणत्वं च ध्वन्यते । स्मेरार्द्राऽधरपल्लवामिति पाठे स्मेरपदस्य धर्मपरतया स्मेरेण स्मितेनेत्यर्थः । एवं च स्मिते ऽमृतरूपत्वं द्योत्यते । स्मेरो विकसितः आर्द्रो ऽधरपल्लवो यस्यास्ताम् । आर्द्रपदेन सुधाद्रवरूपत्वमधरे व्यज्यते इत्यपि कश्चित् । नववधूम् अभिनवयौवनां नायिकाम् । अन्यामपराम् समालिङ्गति । लटा वर्तमानत्वप्रतिपादनेनाऽतिप्रियत्वमालिङ्गने ध्वन्यते । अत्रापि पूर्वोक्तरीत्या ज्येष्ठाकनिष्ठे बोध्ये । शार्दूलविक्रीडितं वृत्तम् ॥१९॥

धैर्याऽधैर्येति । धैर्याऽधैर्याङ्गीकाराऽऽग्रहशीलयोर्मृगदृशोः प्रीतये रत्नद्वयं मुष्टिद्वये न्यस्तवान्स्थापितवान् । परं तु प्रथमत आदौ ए-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकस्याः कलयन् करे प्रथमतो रत्नं परस्याः प्रियो
हस्ताहस्तिमिषात्स्पृशन्कुचतटीमानन्दमाविन्दति ॥२०॥

धीराऽधीराज्येष्ठाकनिष्ठे उदाहरति धैर्याऽधैर्येति । काचित्प्रत्याह धैर्याऽधैर्यपरिग्रहंग्राहिलयोः धैर्यमधैर्यं च धैर्याऽधैर्ये तयोः परिग्रहो ऽङ्गीकारः । तत्र ग्रहिले आग्रहशीले तयोः तदाग्रहवत्योरित्यर्थः । एणीदृशोर्नायिकयोः । एणीपदं चाञ्चल्यविस्तारवत्त्वादिकं व्यञ्जयति । प्रीतये सन्तोषाय अनन्तकान्तिरुचिरं दीप्तिविशेषसुन्दरम् । रत्नद्वन्द्वं मणिद्वन्द्वम् । द्वयोरश्मजातौ मुक्तादि कंपि चेत्यमरः । मुष्टिद्वये बद्धकरद्वये मुष्टिपदेन शीघ्रग्रहणाऽयोग्यत्वं तेन च चिरतरज्येष्ठाकुचकलशमंस्पर्शनाऽऽसक्तिर्व्यज्यते । न्यस्तवान् न्यासीकृतवान् । परंतु प्रथमत आदौ एकस्याः कनिष्ठायाः करे हस्ते रत्नं कलयन् ग्राहयन् परस्या ज्येष्ठाया इत्यर्थः । हस्ताहस्तिमिषात् हस्ते हस्ते गृहीत्वा इति हस्ताहस्ति । तद्व्याजात् । न च समासशास्त्रेणेदं युद्धं प्रवृत्तमित्यस्मिन्नर्थे समासविधानात् प्रकृते च तदभावान्न समास इति वाच्यम् । वादिप्रतिवादिनो युध्यन्तीति प्रयोगाद्वा वाद्युद्धमिव परस्परं हस्तग्रहणे क्रियाप्रतिक्रियापक्षेपरूपयुद्धप्रवृत्तेर्भवत्येव समासः । वस्तुतस्तु "कर्णाकर्णि प्रथित"-मित्यादिमहाकविप्रयोगान्न दोषः । कुचतटीं स्तनतटीं स्त्रीलिङ्गनिर्देशेन कामुकस्याऽतिशयितप्रेमास्पदत्वं ध्वन्यते । स्पृ-

कस्याः कनिष्ठाया हस्ते रत्नं कलयन्ग्राहयन् परस्या ज्येष्ठाया हस्ताहस्तिमिषेण क्रीडायामपि युद्धत्वारोपः सपत्नीप्रतारणाय । मुष्टिपदेन शीघ्रग्रहणाऽयोग्यत्वम् । तेन चिरतरहस्तव्यापारध्वनिः ॥ २० ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अप्रकटपरपुरुषाऽनुरागा परकीया । सा च द्विधा । प-

शन् आनन्दं सन्तोषम् आविन्दति प्राप्नोति । अत्र ज्येष्ठाकनिष्ठे स्फुटे एव । उदाहरणत्रये ऽपि छलमलङ्कारः 'छलमन्याऽनुरोधेन मुधा ऽन्यस्य प्रकाशन'मिति तल्लक्षणात् । शार्दूलविक्रीतं वृत्तम् ॥ २० ॥

प्राप्ताऽवसरत्वात् परकीयां लक्षयति अप्रकटेति । परपुरुषविषयाऽस्फुटाऽनुरागवत्त्वं परकीयात्वमित्यर्थः । अप्रकटपदोपादानात् सामान्यवनितायां नाऽतिव्याप्तिः । परपदोपादानान्न मुग्धायाम् । यत्तु अप्रकटितेति पाठः । एवं च

ज्ञाता मैत्री सहजमधुरापातिभिर्लोचनान्तैः
कर्णाकर्णि प्रथितमयशो बन्धुवर्गैरभाणि ।
सत्यप्येवं तदपि न मनाङ् मुञ्चति प्राणनाथं
को जानीते कुवलयदृशः कीदृशः प्रेमबन्धः ॥

इति वर्णनाल्लोकैः परपुरुषाऽनुरागे ज्ञातेपि या स्वयं प्रकटीकरोति अहमस्मिन्नासक्तेति सा परकीयेति । तन्न । अहमस्मिन्नासक्तेति वित्तमात्राऽनुपाधिप्रकटितपरपुरुषाऽनुरागायाः क्वाऽन्तर्भाव इति दोषापत्तेः । कन्यायां तु भाविपुरुषापेक्षया परत्वमवसेयम् । मम तु वित्तमात्राऽनुपाधिकपरपुरुषाऽनुरागवत्त्वं परकीयात्वमिति युक्तमाभाति । एवं च वित्तमात्राऽनुपाधिकप्रकटपरपुरुषाऽनुरागवत्याः क्वाऽन्तर्भाव इति न शङ्काऽवकाशः । तां विभजते सा चेति । तामे-

अप्रकटत्वमस्फुटत्वम् । तच्च विदग्धजनमात्रवेद्यत्वम् । अस्फुटेत्युक्त्या सामान्यवनितायां नाऽतिव्याप्तिः । परपदोपादानान्न मु-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोढा कन्यका च । कन्यकायाः पित्राद्यधीनतया परकीयता । अस्या गुप्तैव सकला चेष्टा ।

परोढा यथा ।

अयं रेवाकुञ्जः कुसुमशरसेवासमुचितः
समीरोयं वेलादरविदलदेलापरिमलः ।
इयं प्रावृड् धन्या नवजलदविन्यासचतुरा
पराधीनं चेतः सखि किमपि कर्तुं मृगयते ॥ २१ ॥

वाह परोढेत्यादि । परेणाऽन्येनोढा परोढा परिणीता । ननु परस्येयं परकीया इति योगात्परस्वत्ववत्याः परिणीताया एव परकीयात्वमुचितं न त्वपरिणीताया इत्यत आह कन्यकाया इति । पितृस्वत्ववत्तया परकीयात्वं कन्यकाया इति भावः । गुप्ता पराऽनभिलक्षितेत्यर्थः ।

तत्र परोढामुदाहरति । अयमिति । का चिन्नायिका निकुञ्जाद्युद्दीपनविभावदर्शनसमयसञ्जातपरपुरुषाऽनुरागा भङ्ग्यन्तरेण साकूतं सखीं प्रत्याह हे सखि विश्रम्भपात्रभूते आलि । सखीपदेन रहस्यकथनार्हत्वं ध्वन्यते । अयं निकटवर्त्ती । एवं च गताऽऽगतश्रमाऽभावो व्यज्यते ।

ग्धायां नापि मध्यायाम् ।

अयमिति । पराधीनं मदनाऽधीनम् । यद्वा श्वश्र्वाद्यधीनम् । पराधीनत्वञ्च स्वेच्छाऽविषयाविषयककृतिमत्त्वम् । किमपि प्राणवियोगरूपम् । यद्वा मे चेतः किमपि पराधीनं वस्तु सख्यधीनं वस्तु परपुरुषभोगरूपं कर्तुं मृगयते इत्यर्थः ॥ २१ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रेवाकुञ्जः रेवासम्बन्धी लतादिपिहितप्रदेशः । रेवापदेन शीतलत्वं कुञ्जे दैनन्दिनस्नानाऽऽगमार्हतया ऽन्यथाजनं-शङ्कापरिहारक्षमत्वं सङ्केतितनायकसुलभाऽऽगमनार्हत्वं च द्योत्यते । कुञ्जपदेनाऽन्याऽनवलोकनीयतया निःशङ्ककेलियोग्यता व्यज्यते । कुसुमशरसेवासमुचितः । मदनस्य सेवा सन्तोष-जनकं कर्म त्रिविधसुरतमिति यावत् । तत्र समुचितो योग्यः, न तु तूष्णीमवस्थातुं द्रष्टुं वेति भावः । न केवलं कुञ्जमात्रमु-द्दीपकमपि त्वन्यदपीत्याह वेलादरविदलदेलापरिमलः । वे-लायां यथाकालं परिपक्वतादशायामित्यर्थः । एवं च गन्ध-सौरभ्यं ध्वन्यते । यद्वा वेलायां कुञ्जमर्यादायां तत्प्रान्तइति यावत् । वेलाकालमर्यादयोरपीत्युभयत्राप्यमरः । वेलाशब्द-स्योदधिमर्यादायां प्रसिद्धावन्यत्रापि प्रयोगे न दोषः । को-शावौ तथानियमाऽभावात् । दरम् ईषत् विदलन्त्यो विक-सन्त्य एलाः एलाफलानि तासां परिमलस्तत्सम्बन्धलब्धः गन्धो यस्मिन् सः । नवेति पाठे नवो ऽभिनवो विदलदेला-परिमलो यत्रेत्यर्थः । यद्वा नूतनविदलनवत्यो या एलास्त-त्परिमलो यस्मिन्सः । एवं च सौगन्ध्याऽतिशयो व्यज्यते । अयं समीपवर्त्तीत्यर्थः । तेनाऽपरिहरणीयत्वं ध्वन्यते । समीरो वा-युरपि वरिवर्ति । सम्यगीरयति प्रेरयति काममिति व्युत्पत्त्या मदनबाधाऽतिशयजनकत्वं द्योत्यते । एवं च विविधसुरतश्र-माऽपनोदन निपुणसमीपवर्त्तिसमीरवत्तयापि सुरतयोग्यत्वं ध्व-न्यते कुञ्जे । किं च नवजलदविन्यासचतुरा नवा नूतनाः सजला इति यावत् । ये जलदाः पयोदास्तेषां विन्यासो रचना तत्र चतुरा निपुणा । अत एव धन्या मदुपकारकत्वेन पुण्यवती-यं पुरो विलसन्ती प्रावृट् वर्षासमयोऽप्यस्ति । एवं चाऽऽगमि-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Siddhanta eGangotri Foundation. Chennai and eGangotri

जलपिच्छिलरेवातटनिकटकुञ्जस्य जनसञ्चाराऽयोग्यतया निः-शङ्कं परपुरुषेण सह विहारयोग्यत्वमिति भावः। स्त्रीलिङ्गनिर्देशेन नवजलदविन्यासेन निविडाऽन्धकारसम्पादकतया स्वकर्त्तव्य-ताऽनुकूलकार्यकारितया सखीत्वमावेद्यते। यद्वा नवजलदसमा-गमशालिनी इयं प्रावृट् सौभाग्यवती। अहं तु परपुरुषसङ्ग-तिविहीना अधन्येति ध्वन्यते। अथ वा इयं नवजलदविन्या-सचतुरा प्रावृट् धन्या त्वं तु परपुरुषसङ्गतिसंपादनाऽनभिज्ञेति अधन्येति सख्युपालम्भो द्योत्यते। एवंविधोद्दीपनवि-भावे सति पराधीनं श्वश्र्वाद्यनेकपरतन्त्रं चेतः किमपि विशिष्य वक्तुमशक्यं कर्तुं मृगयते। एवं च चेतो न तूष्णीमवतिष्ठते परतन्त्रता चेयं विदितैव भवत्या तथा च यथा न कस्यापि ज्ञातं भविष्यति तथा का-मुको ऽवश्यमानेय इति प्रच्छन्नकामुकाऽभिलाषो व्यज्यते। यद्वा परस्मिन्पुरुषे अधीनं नियन्त्रितं परपुरुषाऽनुरागगुण-स्मृतं चेतः। ममेति पदाऽनुपादानं दुःखजननोद्युक्ते मनस्या-ऽऽत्मीयत्वाऽभावमावेदयति। किमप्यनिर्वचनीयमनुचितं प्रा-णवियोगं जनयितुं मृगयते विचारयति। एवं च यावत्काल-मेतच्चित्तं न तदुत्पादयति तावन्मध्ये परपुरुषसमागमार्थं यत्नं कुरुष्व नो चेदग्रे मम जीवनमसम्भवतीति ध्वन्यते इति सखीं प्रति गुप्ततया स्वहृद्गताऽभिधानम्। लोकं प्रति तु अयं रेवाकुञ्जः 'रेवातीरे तपः कुर्या'दिति स्मरणात् पावनत्वं ध्वन्यते। कुसुम-शरसेवासमुचितः कुसुमैः पुष्पैरेव न तु रत्नादिभिः शं सुखं रा-त्यङ्गीकरोति एतादृशस्य भक्तिमात्रप्रियस्य परमेश्वरस्याऽऽरा-धनोचितः। तथा वेलानवविदलदेलापरिमलः। वेलायां क्षुद्धो-धसमये नवविदलदेलागन्धः समीरोप्यस्ति स एव तृप्तिजनको

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुप्ताविदग्धालक्षिताकुलटाऽनुशयानामुदिताप्रभृतीनां

भविष्यति इत्याहारान्तरनिवृत्त्यापि अत्र परमेश्वरभजनं कर्तुं शक्यमिति भावः । तथा च नवजलदविन्यासचतुरा धन्या छायासंपादकतया तापसोपकारित्वादिति भावः । प्रावृडप्यस्ति । एवंविधपरमेश्वरोपासनाऽनुकूलपदार्थवत्यप्यस्मिन् प्रदेशे पराऽधीनं परः सर्वोत्कृष्टः अस्मदीयप्राणप्रियः तदधीनं तच्चरणारविन्दासक्तं चेतः किमपि कर्तुं मृगयते इति काक्वा न किमपि कर्तुं मृमयते इत्यर्थः । एवं चाऽस्माकं स्वाम्येवोपास्य इत्यभिधानाल्लक्षणासङ्गतिः । अत्रैवमुपन्यासरूपवस्तुना परपुरुषप्रच्छन्नाऽनुरागित्वप्रकाशनरूपवस्तुध्वनिः । शिखरिणीवृत्तम् ।

ध्वजः कर्णो हारो द्विजवरगणस्थो रसयुतः
समुद्रो रत्नं च प्रभवति यदा सप्तदशभिः ।
भुजङ्गेन्द्रोद्दिष्टा विबुधहृदयाऽऽह्लादजननी
रसै रुद्रैर्यस्यां विरतिरिह सैषा शिखरिणी ॥
इति तल्लक्षणात् ॥ २१ ॥

ननु परकीयाया गुप्तादिभेदसत्त्वात्तदनभिधानान्न्यूनतेत्यत आह गुप्तेति । मतिबुद्धिपूजार्थेभ्यश्चेति चकारस्याऽनुक्तसमुच्चयार्थकत्वाद्वर्त्तमाने कर्तरि क्तः । सुरतगोपनकर्तृत्वं गुप्तात्वम् । पुंश्चलीभावनिपुणत्वं विदग्धात्वम् । जारसमूहगामित्वं

गुप्तेत्यादि । सुरतगोपनकर्तृत्वं गुप्तात्वम् । पुंश्चलीभावनिपुणात्वं विदग्धात्वम् । जारसमूहगामित्वं कुलटात्वम् । इष्टहानिजनिताऽनुतापवत्त्वमनुशयानात्वम् इति । मुदिताप्रभृतीनाम् । एतादृशीनामन्यासामपीत्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परकीयायामेवाऽन्तर्भावः। गुप्ता त्रिधा। वृत्तसुरतगोपना वर्त्तिष्यमाणसुरतगोपना वृत्तवर्तिष्यमाणसुरतगोपना च। त्रितयमपि यथा।

श्वश्रूः क्रुध्यतु विद्विषन्तु सुहृदो निन्दन्तु वा यातरस्तस्मिन्किं तु न मन्दिरे सखि पुनः स्वापो विधेयो मया।

कुत्सितं लटति वक्तीति व्युत्पत्त्या कुत्सितभाषित्वं वा कुलटात्वम्। इष्टहानिजनिताऽनुतापवत्त्वमनुशयानात्वम्। प्रभृतीनामिति। एतत्प्रकाराणामन्यासामित्यर्थः। तत्पार्थक्येनैषामनुपलम्भादिति भावः। परकीयायामेवेति। परोढोदाहरणोत्तरमेवैतासामुदाहरणोपन्यासात्तदुदाहरणेषु श्वश्र्वादिपदोपादानाच्च। गुप्तां विभजते गुप्तेति। त्रैविध्यमेवाह वृत्तेत्यादि। वृत्तरतमात्रगोपना वर्त्तिष्यमाणरतमात्रगोपना उभयगोपना चेत्यर्थः।

त्रयमप्युदाहरति। श्वश्रूरिति। कापि परपुरुषोपभोगचिह्नान्यपलपितुं सखीं प्रत्याह हे सखि। सखीत्वेन स्वचरितकथनार्हत्वेपि तद्गोपनादत्यन्तं गम्भीरत्वमावेद्यते। श्वश्रूर्भर्तृजननी क्रुध्यतु कुप्यतु। श्वश्रूपदेन तत्कृतकोपसहनयोग्यत्वं स्वस्मिन् ध्वन्यते। किं च सुहृदो मित्राणि विद्विषन्तु मा प्रीणन्तु। सुहृत्पदेन तत्प्रीतिजनककर्मकरणयोग्यत्वेपि स्वयं तदकरणात्तत्सदनस्वापस्याऽतिदुःखप्रदत्वं व्यज्यते। तथा यातरो देवरपत्न्योपि। भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परमिति कोशात्। निन्दन्तु अप-

श्वश्रूरिति। हे सखि। सखीत्वेन स्वचरितसुरतगोपनार्हता। श्वश्रूपदेन तत्कृतकोपसहनयोग्यत्वम्। सुहृदो मित्राणि। तत्तद्वच-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आखोराक्रमणाय कोणकुहरादुत्फालमातन्वती
मार्ज्जारी नखरैः खरैः कृतवती कां कां न मे दुर्दशाम्॥२२॥

वदन्तु । तद्वचनाऽकरणमेव क्रोधादित्रये हेतुः । किं तु तस्मिन् ताभिरादिष्टे मन्दिरे सद्मनि पुनः अन्यवारं स्वापो निद्रा नैव विधेयः । निद्राविधाने निदानमाह । आखोर्मूषकस्य उन्दुरुर्मूषको ऽप्याखुरित्यमरः । एकवचनेनाऽतिदुर्लभतया उड्डीनबाहुल्यमभिव्यज्यते । आक्रमणाय अङ्गीकरणाय जिघांसयेति भावः । कोणकुहरात् गृहैकदेशसङ्कटप्रदेशात् । कुहरपदेन जागराऽवस्थायामपि तत्र स्थिताया अपि मार्ज्जार्या अदर्शनमावेद्यते । तेनाऽनिवारितत्वं च । उत्फालम् उड्डानम् । एकवचनं सजातीयत्वप्रतिपादनद्वारा नखक्षतानां नियतस्थानकत्वं व्यञ्जयति । आतन्वती विस्तारयन्ती । एवमुड्डीनबाहुल्यप्रतिपादनेन नखक्षतबाहुल्यं प्रतिपाद्यते । मार्ज्जारी बिडाली । मार्ज्जारीति

नाऽकरणमेव क्रोधादित्रये हेतुः । स्वापाऽभावे कारणमाह । आखोरिति । आखोरित्यनेनोड्डानबाहुल्यं व्यज्यते । आक्रमणायाऽऽहननाय । कोणकुहरात् अन्धतमसग्रस्तगृहसङ्कीर्णाऽवयवात् । तेन जागराऽवस्थायां विद्यमानायामपि मार्ज्जार्या दर्शनाऽयोग्यत्वम् । उत्फालमुड्डानमातन्वती विस्तारयन्ती । तेनोड्डानबाहुल्येन नखक्षतबाहुल्यम् । मार्ज्जारीति स्त्रीलिङ्गेन परपुरुषकरस्पर्शो नास्तीति स्वस्मिन्सतीत्वम् । तेन गुप्तपरपुरुषाऽनुरागो ध्वन्यते । कां कामनिर्वचनीयाम् । पूर्वमज्ञानात् । स्वापकरणेन मार्ज्जारीकृतेयमवस्थेति वृत्तगोपनम् । पुनरपि श्वश्र्वादिनियोगेन करिष्यामि चेदियमेवाऽवस्थेति वर्तिष्यमाणतद्गोपनम् । तृतीयोप्यार्थसमाजग्रस्त इति बोध्यम् । आर्थसमाजग्रस्तत्वादेव तृतीयो भेद एव नास्तीत्याहुः ॥ २२ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदग्धा च द्विविधा। वाग्विदग्धा क्रियाविदग्धा च। तत्र वाग्विदग्धा यथा।

निबिडतमतमालवल्लिवल्ली-
विचकिलराजिविराजितोपकण्ठे।
पथिक समुचितस्तवाऽद्य तीव्रे
सवितरि तत्र सरित्तटे निवासः॥ २३॥

स्त्रीलिङ्गनिर्देशेन परपुरुषकरस्पर्शाऽभावोपदर्शनात् स्वस्मिन् सतीत्वमावेदयति। तेन गुप्तपरपुरुषाऽनुरागवत्त्वं ध्वन्यते। खरैस्तीक्ष्णैः। खरपदं दुःसहत्वं व्यञ्जयति। खरैर्नखरैः नखो ऽस्त्री नखरो ऽस्त्रियामित्यमरः। मे मम कां कां विशिष्य वक्तुमशक्यामित्यर्थः। दुर्दशां विडम्बनां न कृतवती। अकार्षीत्। अपि तु या दुर्दशा कृता सा ते विदितेति भावः। पुनः स्वापो न विधेय इत्यनेनैकदा ऽज्ञानात् स्वापः कृतस्तेनेयमवस्था सञ्जातेति वृत्तरतगोपनात् पुनः श्वश्रूप्रभृतिभिर्बलात्तत्रैव स्वापार्थं प्रेषिता चेत्तर्ह्येवं मे भावीति वक्ष्यमा-

निबिडेति। हे पथिक पान्थत्वेन वासस्थानकथनयोग्यता व्यज्यते। निबिडतमा ये तमालास्तान्वल्लन्ते वेष्टयन्ति तमालवल्लिन्यः ताश्च ता वल्लयो लताश्च मल्लिवल्लीपाठे मल्लन्ते शोभन्ते ताश्च ता वल्लयश्चेत्यर्थः। ताश्च विचकिलवल्लीप्रसूनानि तेषां च राजिभिः विराजितसमीपदेशे सरित्तटे इत्यर्थः। तेनाऽन्यजनाऽनवलोकनीयत्वम् अतिशयोद्दीपकत्वं शीतलत्वं सन्तापहरत्वं च व्यञ्जयति। तत्र प्रसिद्धे। केन पथा गन्तव्यमिति सन्देहो न विधेय इति भावः। तेन तदेव सङ्केतस्थानमिति व्यज्यते॥ २३॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

णरतगोपानात् उभयरतगोपनस्याऽऽर्थसमाजसिद्धत्वादुदाहरण-सङ्गतिः । वस्तुतस्त्वार्थसमाजसिद्धत्वादेव न तृतीयो भेद इत्याहुः । अत्र "व्याजोक्तिः शङ्कमानस्य छद्मना वस्तुगोपन"मिति लक्षणलक्षितव्याजोक्तिरूपाऽलङ्कारेण परपुरुषसम्भोगचिह्न-गोपनरूपवस्तुध्वनिः । शार्दूलविक्रीडितं वृत्तम् ॥ २२ ॥

विदग्धां विभजते । विदग्धा चेति । द्वैविध्यमेवाह वागिति ।

प्रथमोद्दिष्टत्वात् वाग्विदग्धामुदाहरति निविडेति । सङ्केतस्थलमुपदिशन्ती का चित् कं चित्प्रत्याह । हे पथिक पान्थ पथिकपदं वसतिस्थलकथनगोग्यत्वं मार्गान्तरवर्तिनदीतीरनिवासयोग्यत्वं च व्यञ्जयति । सवितरि सूर्ये तीव्रे अतिशयिततापकारिणि सति मध्याह्ने इत्यर्थः । एवं चाऽहिमकरखरकरनिकरभीत्या जनसञ्चारशून्यतया ऽग्रिममार्गस्याऽतिदुर्गमत्वमावेद्यते । निविडतमतमालमल्लिवल्लीविचकिलराजिविराजितोपकण्ठे । निबिडतमम् अतिशयेन निविडमिति निबिडतमम् । यद्वा अतिशयेन निबिडा इति निबिडतमाः अतिशयितनैरन्तर्यशालिन इत्यर्थः । ये तमालाः वृक्षविशेषाः तान् वल्लन्ते वेष्टयन्तीति वल्लञ् स्तृतावित्यस्मात् णिनिः । वल्लन्तश्च विचकिलाश्च मल्लीप्रभेदो विचकिलः स्मृतो विचकिलो मल्लीप्रभेदे मदे मदनेपि चेति विश्वः । तेषां राजयः श्रेणयस्ताभिर्विराजितो विभूषित उपकण्ठो ऽन्तिकप्रदेशो यस्मिन् उपकण्ठाऽन्तिकाऽभ्यर्णेत्यमरः । निबिडतमपदमन्यजनाऽनवलोकनीयत्वं व्यञ्जयति । वल्लिपदं यत्राऽचेतनयोरपि परस्परमालिङ्गनं तत्र किमु वाच्यं चेतनयोरित्यतिशयितोद्दीपकत्वं नदीतटस्य ध्वनयति । तत्र मार्गवर्तिनि । यद्वा प्रसिद्धे । एवं च केन पथा कथं वा तत्र गन्तव्यमिति मनसि न विधेयमिति भावः । स-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रित्तटे नदीतीरे। अद्य दिने अद्येत्यावश्यकत्वं द्योतयति। निवासः। निवसतिः। समुचितः। सम्यक् उचितः योग्यः। एवं च तत्र वसतावनौचित्यं नाऽऽशङ्कनीयमिति ध्वनयति। तपनखरकरसन्तप्तस्य निबिडच्छायशीतलजलवत्प्रदेशे वसतिरुचितैवेति भावः। एवं च तपनकरसन्तप्तस्य मार्गजन्यश्रमवतः सुखावहवसतिस्थलकथकत्वेन दयाशीलत्वप्रदर्शनात् गुप्तपरपुरुषाऽनुरागवत्त्वं द्योत्यते। यद्वा विराजित उपकण्ठे इति पदद्वयं च। हे विराजित वर्तमाने क्तः। सर्वाङ्गीणलावण्यशील सुकुमारशरीर पथिक तीव्रे सवितरि निबिडतमतमालमल्लिवल्लीविचकिलराजि विचकिलै राजते शोभते सत्सूद्विषेति क्विप्। तत्र सरित्तटे यद्वा उपकण्ठविशेषणम्। एवं च निबिडतमतमालसम्बन्धिविचकिलमालाशालिनीत्यर्थः। निबिडतमतमालसम्बन्धोत्कीर्तनेनाऽम्लानत्वं मालासु तेन च सौगन्ध्याऽतिशयवत्त्वं हृदि ध्वन्यते। उपकण्ठे कण्ठस्य समीपे अर्थान्मम वक्षःस्थले इत्यर्थः। तव निवासो योग्यः। सुकुमारशरीरस्य तीव्रतरतपनतापितस्य मार्गश्रान्तस्य भवतो ऽद्य ग्रीष्मसमये चन्द्रोपलकलशाभ्यामिव पयोधराभ्यामतिशीतलं विचकिलमालासुरभि मम हृदयभूतलमेव तव तापहरणप्रवणमिति भावः। जनसञ्चारविरहिणि शीतलतरे रत्युचिते नदीतीरे मध्याह्ने मत्प्रतीक्षया स्थेयम्। अहमपि तस्मिन्नेवाऽवसरे समागम्य त्वामतिगाढमालिङ्गयामीति नदीतीरमेव सङ्केतस्थलमिति पथिकं प्रति साऽभिप्रायवचनरचनाविशेषेण वक्तीति वाग्विदग्धेयम्। अत्रैवं वाग्रूपवस्तुना सङ्केतदानरूपवस्तुध्वनिः। न चा"ऽत्राऽसमस्तपदप्राया वैदर्भीरीति"रिति लक्षणलक्षितायाः शृङ्गारोपयोगिन्या वैदर्भीरीतेरनादरा"द्वोजः का-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियाविदग्धा यथा ।

दासाय भवननाथे बदरीमपनेतुमादिशति ।
हेमन्ते हरिणाक्षी पयसि कुठारं विनिक्षिपति ॥ २४ ॥

न्तिमती गौडी"ति लक्षणलक्षितायाः रौद्ररसोपयोगिन्या गौडीरीतेर्निबन्धनादनौचित्यमिति वाच्यम् । प्रायःपदेन क्वचिद्दीर्घसमासवत्त्वेपि तस्याऽनुज्ञानात् । परं तु सुकुमारकठिनवर्णवत्त्वादेवाऽनयोर्भेदः । पुष्पिताग्रावृत्तम् ॥ २३ ॥

क्रियाविदग्धामुदाहरति । दासायेति । का चित्कां चित्प्रत्याह भवननाथे गृहपतौ न तु प्रिये । एवं चैतादृशकर्मकर्तव्यस्यौचित्यं ध्वन्यते । दासाय सेवकाय न त्वन्यस्मै । एवं चाऽन्वयभाविबदरीविच्छेदभिया कुठारगोपनमुचितमिति भावः । बदरीं स्वचौर्यरतस्थानभूतां कर्कन्धूर्बदरी कोलिरित्यमरः । अपनेतुम् आमूलाच्छेत्तुम् आदिशति आज्ञापयति सति हरिणाक्षी चञ्चललोचना सङ्केतभङ्गभियेति भावः । यद्वा कुत्र कुठारस्त्याज्यो यत्र न केनापि ज्ञेय इति स्थलगवेषणार्थमिति भावः । झटिति कुठारदूरीकरणार्थमेवेति भावः । हेमन्तऋतौ तत्र जलस्याऽतिशयितशीतलत्वात् पयसि जलमध्ये न तु तीरे । एवं च दुष्प्रापत्वं व्यज्यते । कुठारं स्वधितिम् । बद-

दासायेति । भवननाथे न तु स्वनाथे न वा प्रिये बदरीं स्वचौर्यरतस्थानभूतामपनेतुं छेत्तुमादिशति स्वसङ्केतभङ्गभिया कुठारं पयसि निक्षिपति । एवं च कुठाराऽभावान्न तच्छेदनम् । गवेषयन्नपि कुठारं दासो न सम्भावयेत् सम्भाव्यापि शीतभिया तोये करं न निक्षिपेत् तत्कालाऽलाभे कार्यान्तरेण विस्मृतिरेव स्यादिति भावः॥२४॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्षिता यथा ।

यद्भूतं तद्भूतं यद्भूयात्तदपि वा भूयात् ।
यद्भवति तद्भवति वा विफलस्तत्र कोपि गोपनायासः ॥ २५ ॥

रीच्छेदनकारणमिति भावः । द्वयोः कुठारः स्वधितिरित्यमरः । विनिक्षिपति गोपायति । गवेषयन्नपि दासो न जले सम्भावेयत् सम्भावयन्नपि शीतकातरतया न करं क्षिपेत् इत्येतत्कालातिक्रमे कार्यान्तरेण विस्मृतिरेव स्यादिति धिया युक्तमेव तत्र तद्गोपनमिति तूष्णीमेव स्वकार्यस्य साधकतया क्रियावैदग्ध्यम् । अत्र च कुठारगोपनवस्तुना स्वचौर्यरतमङ्कुतनिकेतनगोपनरूपवस्तुध्वनिः । उपगीतिच्छन्दः ॥ २४ ॥

लक्षितामुदाहरति यद्भूतमिति । का चित्स्वं प्रति निवारणकारिणीमन्यत्र तद्गोपनकारिणीं सखीं प्रत्याह हे सखि यद्भूतम् यज्जातम् । विचार्य्याऽविचार्य वा यदनुष्ठितमित्यर्थः । तद्भूतमेव जातमेव । जातस्योपायशतैरप्यनिवर्त्तनीयत्वात् इति भावः । सबाधकमिदमतो न कर्तव्यमित्यत्राह यद्भूयादिति यदरिष्टं भूयादेवं भविष्यत्येव । भाविपदार्थस्य केनापि निनिवारयितुमशक्यत्वादिति भावः । ननु 'यद्भाव्यं तद् वि-

लक्षिता विदग्धा विदितपरपुरुषाऽनुरागेत्यर्थः ।

का चित्स्वसखीं स्वनिवारणकारिणीमन्यत्र तद्गोपनकारिणीं प्रत्याह यद्भूतमिति । यातस्याऽवश्यम्भाविनो निवृत्त्यभावादिति भावः पूर्वार्द्धस्य । नन्वेवं सत्यनिष्टं स्यादत आह यद्भवतीति । कोप्यनिर्वचनीयः । गोपीति पाठे श्रीकृष्णस्य गोपीं प्रति वचनम् ॥ २५ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नश्यती'ति न्यायाद्दैवमात्रशरणता नोचितेत्यत आह यद्भवति यदाचर्य्यते तद्भवत्या ऽऽचरितव्यमेवेत्यर्थः ।

अनारम्भो मनुष्याणां प्रथमं बुद्धिलक्षणम् ।
आरब्धस्याऽन्तगमनं द्वितीयं बुद्धिलक्षणम् ॥

इति नीतिरीतिनिपुणस्मरणादेतादृशाचरणमेव नारम्भणीयम् । आरब्धे तु नोचितस्त्याग इति भावः । यद्वा भाव्यरिष्टस्याऽवारणीयतया यद्भवति यत्क्रियते तद्भवत्येव कर्तव्यमेवेत्यर्थः । अरिष्टस्याऽवश्यम्भावित्वादेतदनाचरणादाचरणमेव वरमिति भावः । गोपनमपि न कार्यमित्याह । कोपि विशिष्य वक्तुमशक्योपि गोपनायासः गोपनप्रयासः विफलः व्यर्थः । लक्षितत्वादिति भावः । यद्वा यत्कृतं तत्कृतमेव यत्क्रियते तदपि क्रियते एव । यच्च कर्तव्यं तदपि कर्त्तव्यमेव । एवं सति तव कश्चिदपि गोपनप्रयासो निरर्थक इत्यर्थः । आयासपदं कर्तव्यतायाः सकललोकप्रथितत्वं व्यनक्ति तच्च लक्षितात्वम् । एवं चैतन्मया न कदापि परित्याज्यमिति व्यज्यते । तेन च कामुकविषयकाऽऽसक्तिविशेषः । अथ वा । विदितनायिकारहस्या वयस्या वक्ति यत्कृतं तत्कृतमेव यत्क्रियेत तत्क्रियते एव यत्कर्तव्यं तत्कर्तव्यमेव । अर्थात्त्वया । एवं च गोपनाऽऽयासो व्यर्थ इत्यर्थः । एवं च सकृदनुष्ठितस्य गोपनं सम्भवति, न सम्भवति सर्वदा ऽनुष्ठीयमानस्येति ध्वन्यते । गोपीति पाठमाश्रित्य कृष्णोक्तिरित्यप्याहुः । अत्र 'नर्मस्फोटस्तु भावानां सूचना या परोक्तितै'रिति लक्षणलक्षितो ऽनुप्रासाऽनुप्राणितो नर्मस्फोटालङ्कारः । उद्गीतिश्छन्दः । आर्याविपर्यस्तदलत्वात् ॥ २५ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुलटा यथा।

एते वारिकणान्किरन्ति पुरुषान् वर्षन्ति नाऽम्भोधराः
शैलाः शाद्वलमुद्वमन्ति न सृजन्त्येते पुनर्नायकान्।

कुलटामुदाहरति। एते इति। का चित् स्वैरिणी धातारमुपालभते। एते दृश्यमाना दयोपकारित्वाभिमानिन इति भावः। अम्भोधरा मेघाः अनुपयोगिभारधारका इति भावः। बहुवचनेनैकस्याप्यनुपकारितया तत्समुदायस्याऽप्रयोजकत्वमावेद्यते। एवमग्रेपि। वारिकणान् जलबिन्दून् अस्मदनुपयोगिन इति भावः। किरन्ति विक्षिपन्ति अप्रार्थिता अपि। किरन्तीति पदं हेयत्वं ध्वनयति। नैतदस्मदुपयोगीत्याह पुरुषान् जारान्। पुरुषपदमुपभोगक्षमत्वं ध्वनयति न वर्षन्ति त्यजन्ति। क्षेपणक्रियाकरणस्य स्वाभाविकत्वात्तस्याः पुरुषविषयकत्वमात्राऽसम्पादनादल्पोपकारित्वस्याप्यभावात् निन्द्यत्वमम्भोधरेषु ध्वन्यते। तेनोपकारहीनाऽम्भोधरजनकतया वेधसोपि तद्व्यज्यते। एवमग्रेपि। तथा शैलाः शिलोच्चयाः कठिनत्वादकारुणिकाः। शाद्वलं तृणम्। उद्वमन्ति प्रकटयन्ति। उद्वमनपदमतिनिन्द्यत्वमावेदयति। नैतदस्मदुपयोगीत्याह। एते शैलाः पुनः नायकान् जारान्। नायकपदं चातुर्यादिगुणवत्त्वं व्यञ्जयति।

एतएवोपकारित्वाऽभिमानिनोऽम्भोधरा अनुपयोगिवारिभारधारकाः वारिकणानस्मदनुपयोगिनः अप्रार्थिता अपि जलं त्यजन्ति न प्रार्थितं पुरुषसमुदायमिति भावः। एवमग्रेपि। पुरुषानिति उपभोगक्षमत्वं व्यज्यते। एवं चाऽनुपकार्यम्भोधरसृष्ट्या विधेरपि निन्दा

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रैलोक्ये तरवः फलानि सुवते नैवारभन्ते जनान्
धातः कातरमालपामि कुलटाहेतोस्त्वया किं कृतम्॥२६॥

न सृजन्त्युत्पादयन्ति । तथा त्रैलोक्ये त्रिषु लोकेषु चतुर्वर्णादित्वात् स्वार्थे ष्यञ् । एवं च भूमिस्थतरूणां पुरुषाऽजनकत्वे प्रार्थ्यमानाः स्वर्गस्थितकल्पपादपा अपि कल्पितफलदानं निजव्रतमपहायाऽस्मदपेक्षितजाररूपफलदानविहीनाः सञ्जाता इति स्वस्याऽतिदुर्दैवतां ध्वनयति । तरवो वृक्षाः ज्ञानहीनाः फलानि सुवते उत्पादयन्ति । सुवते इति पदमनुपयोगित्वमावेदयति । जनान् जारान् जनपदं शान्तिरसविमुखत्वं द्योतयति । अतः हे धातः ब्रह्मन् त्वया विश्वसृजा । एवं च को वा ऽन्यस्तिष्ठति समर्थो यं प्रत्युपालम्भ इति भावः । यस्य निखिलकार्यकरणे न कोपि श्रमस्तस्य मदपेक्षितकरणे को वा श्रम इति भावः । कुलटाहेतोः कुलटार्थे किं कृतं न किमपीत्यर्थः । इति कातरमालपामि दीनोपालम्भं वदामीत्यर्थः । एवं च दीनहृदयवाञ्छाविज्ञानमात्रादेव तत्सम्पादनमुचितं महतां किं पुनस्तदीरितं सम्पादनीयमिति भावः । यद्वा त्वया कुलटार्थे किंकृतं कुत्सितं कृतमित्यर्थः । अम्भोधराद्या न के-

ष्यङ्ग्या । शाद्वलं तृणम् । नायकान् चातुर्यादिगुणशालिनः । त्रैलोक्यइति स्वःस्थितकल्पवृक्षा अप्यस्मदभिलषितफलाऽदातार इति स्वस्याऽतिदुर्दैवता व्यज्यते । धातरित्यनेन यस्य निखिलकार्यकरणेपि न कोपि श्रमः तस्य मदभिलषितसम्पादने कथं श्रम इति व्यज्यते । कातरं कृपणम् । किं कुत्सितं मेघादीनामिष्टसम्पादकत्वम् उद्दीपनरूपाऽनिष्टजनकत्वं चेति भावः ॥ २६ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुशयाना यथा। वर्तमानस्थानविघटनेन भाविस्थानाऽभावशङ्कया स्वाऽनधिष्ठितसङ्केतस्थलं प्रति भर्तुर्गमनाऽनुमानेनाऽनुशयाना त्रिधा। प्रत्येकमुदाहरणानि।

समुपागतवति चैत्रे निपतितपत्रे लवङ्गलतिकायाः।
सुदृशः कपोलपाली शिव शिव तालीदलद्युतिं लेभे ॥ २७॥

वलं नायकाऽजनकाः मत्युत मदनोद्दीपकजलशीतलनूतनतृणाङ्कुराऽभिनवफलानि जनयन्तीति न केवलं निरर्थकत्वमपि तु दुरर्थकत्वमिति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ २६ ॥

अनुशयानां विभजते वर्तमानेत्यादि। वर्तमानसङ्केतनिकेतरूपेष्टहानिजनिताऽनुतापवत्त्वमित्यादिलक्षणत्रयं बोध्यम्।

आद्यामुदाहरति समुपागतवतीति। का चिद् कस्याश्चिद् वृत्तं स्वसखीं प्रत्याह लवङ्गलतिकायाः। अनुकम्प्या लता लतिकेत्यनुकम्पायां कन्। विगलितदलत्वादिति भावः। अर्थाच्चौर्यरतसङ्केतभूताया इत्यर्थः। यत्तु अल्पा लता लतिकेति व्याख्यानं तत्सङ्केताऽनर्हत्वप्रतिपादनादयुक्तम्। लतैव लतिकेति स्वार्थे एव जात्यभिप्रायकमेकवचनम्। निपतितपत्रे निपतितानि स्वयमेव गलितानि पत्राणि दलानि यस्मिन् तत्र चैत्रे मासीत्यर्थः। स्वसङ्केतनिकेतभङ्गके समुपागतवति प्राप्तवति सति। सुदृशः शोभने दृशौ यस्याः सुष्ठु पश्यतीति वा। एवं च समीचीनसङ्केतविचारव्याकुलत्वं द्योत्यते। क-

समुपागतेति। अनुकम्प्या लता लकिका तालीदलेति सङ्केतभङ्ग्या उपेतीति भावः ॥ २७ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निद्रालुकेकिमिथुनानि कपोतपोत-
व्याधूतनूतनमहीरुहपल्लवानि ।

पोलपाली गडस्थली । स्त्रीलिङ्गनिर्देशेन सजातीयतया दुःखवत्त्वस्य युक्तत्वं ध्वन्यते । शिवशिवपदं मदनबाधानिवारकतया प्रकृतौचित्यमावेदयति । द्विरुक्तिर्दुःखाऽतिशयं व्यञ्जयति । तालीदलद्युतिम् । ताली वृक्षविशेषः तस्य दलं नवोदितं पत्रमित्यर्थः । तस्य द्युतिं पाण्डुरकान्तिं लेभे प्राप । लेभे इत्यनेन तत्कान्तिप्राप्तौ श्रमाऽऽयासजन्यत्वं तेनाऽतिविरहकातरत्वं सङ्केतनिकेतभङ्गदुःखेनेति भावः । तालीति स्त्रीलिङ्गनिर्देशात्सजातीयतया द्युतेः शीघ्रप्राप्यत्वं व्यज्यते । यद्वा कामिनीत एव तत्प्राप्त्या सतीत्वं तेन गुप्तपरपुरुषाऽनुरागवत्त्वं द्योत्यते । गीतिश्छन्दः ॥ २७ ॥

द्वितीयामुदाहरति निद्रालुकेकीति । का चित्प्रियवसतिं नीयमानां तत्र चौर्यरतसङ्केतनिकेतनाऽभावशङ्कया व्याकुलां नायिकां समाश्वासयति । हे तन्वि कृशाङ्गि । तन्विपदं चिन्ताऽतिशयं व्यञ्जयति । यतः तत्रापि प्रियवसतावपि निद्रालुकेकिमिथुनानि निद्रालूनि निद्राशीलानि स्पृहिगृहीत्यालुच् । प्रशस्ता केका मयूरवाणी येषाम् । प्रशंसायां णिनिः । तेषां बर्हिणां मिथुनानि स्त्रीपुंद्वन्द्वानि येषु । निद्रालुपदमाश्वस्तत्वं ध्व-

का चित्प्रियवसतिं नीयमानां चौर्यात् सङ्केतस्थानाऽभावशङ्काव्याकुलां नायिकामाह निद्रालुकेकीति । अनेन जनसञ्चारशून्यत्वं तेन गुप्तरतयोग्यत्वं मिथुनपदेन तयोः परस्परविरहाऽसहिष्णुत्वं तेन च विविधोद्दीपनशालत्वं तेन च नानाविधसुरतौचित्यं ध्वन्यते ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Siddhanta eGangotri Foundation, Chennai and eGangotri

तत्रापि तन्वि न वनानि कियन्ति सन्ति
खिद्यस्व न प्रियतमस्य गृहं प्रयाहि ॥ २८ ॥

नयति। तच्च जनसञ्चारशून्यत्वम्। तच्च गुप्तरतयोग्यत्वम्। केकिपदं घनतरघनोदयजनकनिबिडतगतरुच्छायावत्त्वं व्यञ्जयति। तच्चाऽन्यानवलोकनीयत्वं तदपि निःशङ्ककेलियोग्यत्वम्। मिथुनपदं परस्परविरहाऽसहिष्णुत्वं द्योतयति। तच्च विविधोद्दीपनविभाववत्त्वं तदपि च नानाविधसुरतौचित्यम्। अयं चैतादृग्वने त्वदभिमतो नायको गीतिसरसरतिश्रमपरिहाराय त्वामालिङ्ग्य निद्रां सुखेन करिष्यतीति विवक्षिताऽन्यपरवाच्यो ध्वनिः। तत्र जाराऽप्राप्त्या केन सह निःशङ्ककेलिरित्यत्राह कपोतपोतव्याधूतनूतनमहीरुहपल्लवानि। केन मूर्ध्ना पवते विलसतीति कपोतः कलरवः स चाऽसौ पोतश्च पवते विलसतीति पोतः अर्भकः। उपसर्जनत्वाऽविवक्षया कपोतशब्दस्य पूर्वनिपातः। तेन व्याधूताः कम्पिताः नूतना अभिनवा महीरुहपल्लवाः तरुकिसलयानि येषु तानि। कपोतेत्यनेन शिरोधूननपूर्वकसविलासगतिकत्वं व्यज्यते। पोतेत्यनेन चपलविलासित्वं ध्वन्यते। तेन च वारंवाराऽऽगमनयोग्यत्वम्। एवं च तादृशजारविलासित्वम्। कलकण्ठकूजितेन शिरोधूननेन करपल्लवचेष्टया च रमयिष्यतीति

पारावतशिशुभिः कम्पितानि नवतरुकिसलयानि येषु तानि। अनेन नानाविधचपलविलासवत्ता ध्वन्यते इत्याहुः। वस्तुतस्तु निर्जनत्वमेवानेनापि। प्रियतमस्येति गोपनाय आपाततो ऽयमेव त्वां तादृशेषु क्रीडयिष्यतीति भावः ॥ २८ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्णकल्पितरसालमञ्जरीपिञ्जरीकृतकपोलमण्डलः ।
निष्पतन्नयनवारिधारया राधया मधुरिपुर्निरीक्ष्यते ॥ २९ ॥

पूर्ववत् ध्वनिः । यद्वा स एव रतावधरदंशनादिना त्वां कम्पितमस्तकां धृतकरकोमलपल्लवां करिष्यतीति पूर्ववत् ध्वनिः । वनानि काननानि कियन्ति कति न सन्ति अपि तु बहूनि सन्ति । अतः । न खिद्यस्व दुःखं मा ऽऽया हि । किं तु प्रियतमस्य प्राणेश्वरस्य जाराऽऽसक्तत्वेन भर्तरि प्रीत्यतिशयाऽभावात् । अल्पाच्तरमित्यत्र तरबुत्तमप् स्वार्थे । गृहं सदनं प्रयाहि गच्छ । अत्रोक्तलक्षणव्याजोक्तिरूपालङ्कारेण नायिकासङ्केतोपदेशप्रतीतिरूपवस्तुध्वनिः । वसन्ततिलकावृत्तम् ॥ २८ ॥

तृतीयामुदाहरति कर्णकल्पितेति । का चित्कां चित्प्रत्याह कर्णे कल्पितोत्तंसीकृता सङ्केतिततरुतले मया गत्वा पराबृत्तमिति राधाप्रत्ययार्थमिति भावः । रसालस्याम्रस्य तस्यैव सङ्केतितत्वादिति भावः । मञ्जरी पुष्पगुच्छविशेषः । तया पिञ्जरीकृतं पिङ्गीकृतम् परागसंसर्गादिति भावः कपोलमण्डलं गण्डस्थलं यस्य सः । कर्णपदं यथेयं मञ्जरी केवलं श्रवणयोग्या तथा त्वदुदीरितं केवलं श्रवणयोग्यमेव न त्वनुभवयोग्यमिति सङ्केतपालनराहित्यं व्यञ्जयति । कल्पितपदं यथान

कर्णेति । कर्णाऽवतंसिताऽऽम्रमञ्जरीपिङ्गलीकृतकपोलः । कर्णकल्पितेत्यनेन त्वदुक्तं श्रवणयोग्यमेव केवलं न त्वनुभवयोग्यमिति ध्वन्यते । रसालत्वेन स्पृहणीयत्वम् । निष्पतदित्यादिना रुदितनिरीक्षणयोः सन्तन्यमानता । सङ्केतिततरुतलगमनज्ञापकमञ्जरीदर्शनेन मयैव तत्र न गतमिति विषादेन रोदनं धारापदेन दुःखाऽतिशयः ॥ २९ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुदिता यथा ।

कथमपि रसालमञ्जर्याः परागाऽपगमस्तथा संस्थापनेन कतिपयाऽधिककालावस्थायितया सङ्केतस्याऽतिप्रियत्वं राधायास्तथाविधप्रत्ययोत्पादनस्याऽऽवश्यकत्वं द्योतयति । रसालपदं स्पृहणीयत्वं ध्वनयति । षष्ठी च विरहकातरत्वं ध्वनयति । मञ्जरीपदेन परिमलबहुलत्वं व्यज्यते । स्त्रीलिङ्गनिर्देशेन सलिलग्रहणयोग्यत्वमावेद्यते । पिञ्जरीकृतपदं रसालमञ्जर्याः कर्णसङ्गमशालिन्याः प्राप्त्यभावाद्वचेतनस्य गण्डस्यापि पाण्डुरतासञ्जायते किमुत चेतनस्येति विरहभीरुतामावेदयति । मधुरिपुर्मधोर्दैत्यस्य शत्रुः कृष्णः । मधुपदमुन्मादकत्वं ध्वनयति तच्च दुराधर्षत्वम् । रिपुपदन्तत्प्रतियोगिकवैरवत्तया जगद्विदितवैभवत्वं व्यञ्जयति । तस्याऽवश्यग्राह्यदर्शनयोग्यत्वं ध्वनयति । उभाभ्यां च कठिनहृदयत्वं तच्च स्वकृतिसञ्जातसङ्केतविघातजनितमन्युतया दुष्प्रापदर्शनीयत्वं द्योतयति । अत एव निष्पतन्नयनवारिधारया निष्पतन्ती निःसरन्ती नयनयोर्नेत्रयोर्वारिधारा जलधारा यस्याः सा । सङ्केतिततरुतलगमनज्ञापकमञ्जरीदर्शनेन मयैव तत्र मन्दभाग्यया न गतमिति विषादेनेति भावः । राधापदेन दुःखाऽतिशयो व्यज्यते । राधया राधयतीति राधा । एवं च मधुरिपुसङ्गमैकचित्तत्वं ध्वन्यते । निरीक्ष्यते । अवलोक्यते । निरीक्ष्यते इति पदं कर्त्तव्यतामूढत्वं व्यनक्ति । रथोद्धता वृत्तम् ॥ २९ ॥

मुदितेति । नायकलाभसम्भावनादिमत्तया ऽऽनन्दवतीत्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोष्ठेषु तिष्ठति पतिर्बधिरा ननान्दा
नेत्रद्वयस्य च न पाटवमस्ति यातुः ।
इत्थं निशम्य तरुणी कुचकुम्भसीम्नि
रोमाञ्चकञ्चुकमुदञ्चितमाततान ॥ ३० ॥

मुदितामुदाहरति गोष्ठेष्विति । का चित्सखी स्वनायिकासन्निधमेत्र पथिकं वक्ति हे पान्थ अस्याः पतिः । पातीति पतिर्भर्त्ता । पतिपदमप्रियत्वं ध्वनयति । गोष्ठेषु गावस्तिष्ठन्त्यत्रेति गोष्ठानि गोष्ठं गोस्थानकं समे इत्यमरः । बहुवचनेन चिरकालप्रत्यावृत्तिकत्वं ध्वन्यते । तिष्ठत्यहर्निशमिति भावः । किं च ननान्दा न नन्दति भ्रातृजायामिति ननान्दा । भर्तृभगिनी । ननान्दापदं नियतद्वेषविशेषवत्त्वं व्यनक्ति । बधिरा श्रवणाऽभाववती । बधिरस्य प्रायेण मूकत्वात् दृष्टमप्यनया

का चित्सखी नायिकासन्निधे पान्थं वक्ति गोष्ठेष्विति । बहुवचनेन चिरकालमप्रत्यावृत्तिः तस्य वृषतुल्यता चाऽत्रावेद्यते । तिष्ठति सर्वदेति शेषः । तेनाऽतिपीडितायामस्यामनुग्रहौचित्यम् । बधिरेति । बधिरस्य प्रायो मूकत्वात् दृष्टमप्यनया वक्तुं न शक्यमिति भावः । नेत्रद्वयस्याऽपाटवात् श्रवणस्य च । इत्थं तरुणी श्रुत्वा । अत्र तरुणीत्यनेन सङ्केतितनायकस्याऽतिस्पृहणीयत्वं सादरश्रवणार्थेन निशम्येत्यनेन सङ्केतस्याऽतिप्रियत्वम् । कुचौ कुम्भाविव करिगण्डाविवेत्यनेनाऽतिकठिनत्वम् । तयोः सीम्नि परिसरे रोमाञ्चाः कञ्चुकमिव कवचमिवोदञ्चितं निबिडं रमणीयं वा विस्तृतं जातम् । कञ्चुकपदेन नैबिड्यं तेन हर्षातिशयः । स्वतः कठिनयोरपि कुचयोः कञ्चुककरणेन विचित्रोद्धतसुरतप्रियत्वमपि व्यज्यते ॥३०॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वक्तुमशक्यमिति भावः । तथा यातुः देवरपत्न्याः नेत्रद्वयस्य नेत्रयुगलस्य च चकाराच्छ्रोत्रयुगलस्य चेत्यर्थः । पाटवं सामर्थ्यं नास्तीत्यर्थः । इत्थं पतिरनागन्ता तद्भगिनीदेवरपत्न्योश्चाऽङ्गविकलत्वं तरुणी चेयं मत्सखी तस्मात्त्वया ऽत्र स्थातव्यमिति सङ्केतद्योतकं सखीवाक्यं निशम्य सादरं श्रुत्वा । एवं च सङ्केतस्याऽतिप्रियत्वं ध्वन्यते । तरुणी नायिका । तरुणीपदं सङ्केतितनायकस्पृहणीयत्वं व्यञ्जयति । तच्चाऽवश्यम्भावि सुरतम् । कुचकुम्भसीम्नि कुचौ कुम्भाविव करिगण्डाविव तयोः सीम्नि परिसरे । कुम्भपदं कठिनत्वं व्यञ्जयति । उदञ्चितमुत्कृष्टं रमणीयं वा रोमाञ्चकञ्चुकम् रोमाञ्चाः कञ्चुकमिव लोहजाऽङ्गत्राणमित्यर्थः । कञ्चुको वारवाणोस्त्रीत्यमरः । कञ्चुकपदं नैबिड्यं ध्वनयति तच्च हर्षाऽतिशयम् । आनतान विस्तारयति स्म । आनन्दादिति भावः । एवं च स्वतः कठिनतरयोरपि कुचयोः सुरतसङ्गरे भङ्गो मा भवत्विति धिया कञ्चुककरणेन सुरतप्रियत्वमभिव्यज्यते । एवं च ननान्दाया बाधिर्येपि नेत्रसत्त्वाद्देवरपत्न्याश्च नेत्राऽभावेपि श्रोत्रसत्त्वात् सुरतप्रतिबन्धकप्रदर्शनेन कथं सङ्केतकरणमिति दूषणमलग्नकं वेदितव्यम् । ऋजवस्तु नात्र सुरतप्रतिबन्धकसामान्याभावविवक्षेत्याहुः । अत्रैतादृशोक्तिवस्तुना पान्थस्य सङ्केतदानप्रतीतिरूपं वस्तु ध्वन्यते । तेन चाऽयमुपभोग्य इति नायिकाहर्षप्राप्तिरूपं वस्तु व्यज्यते । बसन्ततिलकावृत्तम् ॥ ३० ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कन्यका यथा ।

किञ्चित्कुञ्चितहारयष्टि सरलभ्रूवल्लि साचिस्मितम्
प्रान्तभ्रान्तविलोचनद्युति भुजापर्यस्तकर्णोत्पलम् ।

सपरिकरां परोढामभिधाय कन्यकां लक्षयति किं चिदिति। काचित्कां चित्प्रत्याह किं चित् कुञ्चितहारयष्टि । किञ्चित् मनाक् कुञ्चिता वलयिता तिर्यग्वलनादिति भावः । हारयष्टिर्हारलता यत्र क्रियायाम् । तथा किंचित्पदं बहुतरतिर्यग्वलने सविधजनस्याऽऽकूतज्ञानं भविष्यतीति सङ्केतदानगोपनं व्यञ्जयति । हारपदं चित्तापकर्षकत्वं स्वच्छान्तःकरणत्वं च ध्वनयति ।। यष्टिपदं कठिनतामावेदयति । सा च कामुकदर्शनसमयसञ्जातविरहकातरताम् । स्त्रीलिङ्गनिर्देशश्च स्वनिष्ठलज्जायास्त्रौचितीं द्योतयति । सा च तव तु वृथा न तद्वक्त्रमुचितमिति निःशङ्कत्वौचित्यम् । समस्तं च सङ्केतागमनावसरे

किं चिदिति । तिर्यग्वलनादिति । किञ्चित्पदं च सविधजनस्य साकूतज्ञानं मा भूदिति । हारत्वेन चित्ताकर्षकत्वम् । सरलेत्यकुटिलेत्यर्थः । कन्यकात्वादेव तेन सस्पृहाऽनवलोकनीयत्वम् । अन्यापदेशेन तिर्यक् स्मितं यत्र तथा कान्तस्य दृङ्मार्गाऽपसरणं प्रान्तयोर्भ्रान्ता विलोचनद्युतिर्यत्र वक्रग्रीवाकरणादेव भुजायां पर्यस्तं सम्बद्धं नेत्रोत्पलं यत्र । अत्र स्मितगोपनेन ज्योत्स्नायां नागन्तव्यमिति प्रान्तभ्रान्तेत्यनेनाऽन्यानवलोकितमागच्छेरिति भुजापर्यस्तेत्यनेन कदा भुजायां त्वत्करकमलसंयोगो भविष्यतीत्यालिङ्ग-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अङ्गुल्या स्फुरदङ्गुलीयकरुचा गण्डस्य कण्डूयनं
कुर्वाणा नृपकन्यका सुकृतिनं सव्याजमालोकते॥ ३१॥

तिर्यग्विलोकनेन जनगोपनकर्त्तव्यतां व्यनक्ति । किं च सरलभ्रूवल्लि सरले अकुटिले भ्रूवल्ली भ्रूलते यत्र । सरलपदेन सस्पृहाऽवलोकनीयत्वं व्यज्यते । वल्लिपदेन सरसत्वं ध्वन्यते । स्त्रीलिङ्गनिर्देशेन स्वीयस्वाभाविककौटिल्यस्यापि त्यागेन कामुकविषयकप्रेमातिशयो द्योत्यते । समस्तेन च स्वीयदूरदर्शित्वम् । साचि तिर्यग्घसितं स्मितं यत्र । अन्यापदेशेन भावः । एवं च हास्यगोपनेन ज्योत्स्नायां नाऽऽगन्तव्यमिति व्यज्यते । किं च प्रान्तभ्रान्तविलोचनद्युति प्रान्तयोरपाङ्गयोर्भ्रान्ता व्याकुला विलोचनयोर्नेत्रयोर्द्युतिः कान्तिर्यत्र । भ्रान्तपदं कामुको दृङ्मार्गान्मा ऽपसरत्विति विरहभीरुतां गमयति । समस्तं च सङ्केतमगनकाले परितो विलोकनेनाऽन्याऽनवलोकनीयतया आगमनगोपनं व्यञ्जयति । किं च भुजापर्य्यस्तकर्णोत्पलम् भुजायां बाहौ 'भुजां च गुर्वी'मिति माघीयप्रयोगदर्शनात् भुजाशब्दः स्त्रीलिङ्गोऽप्यस्ति । पर्यस्तं पतितं कर्णोत्पलम् अवतंसीकृतमिति भावः । एवं च मद्भुजायां कदा त्वत्करकमलसङ्गो भविष्यतीत्यालिङ्गनौत्क-

नौत्कण्ठ्यम् करणस्य कण्डूयनमित्यनेन बद्धमौनेनाऽगन्तव्यमिति त्वद्वचनामृतपात्रता ऽस्य भवत्विति गण्डस्येति पाठे मत्कपोलयोश्च स्वकरेण पत्रावली रचनीयेति व्यङ्ग्यम् । नृपकन्यकेति दुष्प्रापत्वम् । यमालोकते स सुकृतीति भावः । अत्र नायकस्य मदनुरक्तेति प्रतीतिर्ध्वनिः ॥ ३१ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वित्तमात्रोपाधिकसकलपुरुषाऽनुरागा सामान्यवनिता।

ण्ड्यं ध्वन्यते। तथा स्फुरदङ्गुलीयकरुचा स्फुरन्ती दीप्यमाना अङ्गुलीयकस्योर्मिकायाः। अङ्गुलीयकमूर्मिकेत्यमरः। रुक् कान्तिर्यस्याः तया। एवं च भूषणस्याऽतिशोभाजनकतया ऽङ्गुल्याः शोभाऽतिशयो ध्वन्यते। अङ्गुल्या गण्डस्य कपोलस्य कण्डूयनं कुर्वाणा विदधती। एवं च मत्कपोले त्वया स्वकरेण पत्रवल्ली विरचनीयेति व्यञ्जयति। कर्णस्येति पाठे त्वद्वचनामृतपात्रता झटित्यस्य कर्णस्य भवत्विति ध्वनयति। नृपकन्यका राजकन्यका। नृपपदं दुष्प्रापत्वं व्यनक्ति। यद्वा इतरनरसंरक्षकस्य स्वीयकन्यकारक्षणे किं काठिन्यमिति तथाविधरक्षणादिपरिहारपुरःसराऽवलोकनेनाऽतिवश्यत्वम्। सुकृतिनं सुकृतपरिपाकवन्तं युवानम्। यस्यक्ष्यते समय इतिवत् यमालोकयते स सुकृतीति वचनव्यक्तिः। सव्याजं तादृशचेष्टाभिः स्वाकूतं ख्यापयन्ती किमपि व्याजीकृत्य धाष्ट्र्याऽभावात् सखीसान्निध्यादिति वा आलोकते विलोकयति। मदनपरवशतयेति भावः। तादृशचेष्टाचरणेन वस्तुना नायकस्य मय्यनुरक्तेयमिति प्रतीतिरूपवस्तुध्वनिः। शार्दूलविक्रीडितं वृत्तम् ॥ ३१ ॥

लब्धाऽवसरत्वात् सामान्यवनितां लक्षयति वित्तमात्रेति। वित्तेतराऽनुपाधिकत्वे सति वित्तोपाधिकसकलपुरुषविषयकाऽनुरागवत्त्वमित्यर्थः। परकीयाया अपि कदा चिद्वित्तो-

वित्तमात्रेति। वित्तेतराऽनुपाधिकत्वे सति तदुपाधिकानुरागवतीत्यर्थः। परकीयाया अपि कदा चिद्वित्तोपाधिकाऽनुरागस-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Siddhanta eGangotri Foundation Chennai and eGangotri

न चाऽग्निमित्रे क्षितिपतावनुरक्तायामैरावत्यामव्याप्तिः। तत्र वित्तमात्रोपाधेरभावादिति चेन्मैवम्। सापि काश्मीरहीरादिदातरि महाराजे ऽनुरक्ता न तु महर्षौ, तेनाऽवगम्यते तत्रापि वित्तमात्रमेवोपाधिरिति। महर्षौ सौन्दर्य्योपाध्यनुरागस्य कालिकाव्याप्यवृत्तित्वेन सार्वत्रिके वित्तमेवोपाधिरिति प्रतिभाति।

पाधिकाऽनुरागवत्त्वात् तत्राऽतिव्याप्तिरतः सत्यन्तम्। ननु तर्ह्यग्निमित्रादिनृपतिसौन्दर्यगुणोपाधिकाऽनुरागभागैरावत्यादावव्याप्तिरित्याह न त्विति। अग्निमित्रैरावतीपदे चारुदत्तवसन्तसेनोपलक्षके। अव्याप्तिमेव विवृणोति तत्रेति। वित्तमात्रोपाधेरभावात् सौन्दर्यादिगुणोपाधिमत्त्वात् इति भावः। उत्तरयति मैवमित्यादि। सापि ऐरावत्यपि। अपिना चारुदत्तगुणलुब्धाया वसन्तसेनायाः संग्रहः। महाराजे ऽग्निमित्रे चारुदत्ते च। महर्षौ अदातरीत्यर्थः। फलितमाह तेनेत्यादि। तेन अदात्रनुरागाऽभावविशिष्टमहाराजाऽग्निमित्राद्यनुरागेण हेतुनेत्यर्थः। अवगम्यते अनुमीयते। तत्रापीति। वित्तमात्रमेव न सौन्दर्यादीत्यर्थः। अयं भावः। ऐरावतीव-

स्वात्सत्यन्तम। अनुरक्तायामिति। सौन्दर्यादिगुणोपाधिनेति शेषः। महर्षाविति। अदातरीत्यर्थः। वित्तमात्रमेवेति। न सौन्दर्यादीत्यर्थः। वस्तुतः सामान्यवनितात्वं कालिकाव्याप्यवृत्तित्वम्। यावद्धनोपाधिकाऽनुरागस्तावत्तत्त्वम्। चिरपरिचयोत्तरं सौन्दर्यादिना ऽनुरागे तु नास्त्येव तत्त्वम्। किं तु परकीयात्वमेव। तदीयाऽनुरागस्य विदग्धमात्रवेद्यतया परकीयालक्षणाऽव्याप्तिः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामान्यवनिता यथा ।

दृष्ट्वा प्राङ्गणसन्निधौ बहुधनं दातारमभ्यागतं
वक्षोजौ तनुतः परस्परमिवाऽऽश्लेषं कुरङ्गीदृशः ।

सन्तसेने वित्तेतराऽनुपाधिकत्वे सति वित्तोपाधिकाऽग्निमित्रचारुदत्तगहाराजाऽनुरागवत्त्वौ अदात्रनुरागाऽभाववविशिष्टरत्नादिदानशीलाऽग्निमित्रचारुदत्ताऽनुरागवत्त्वात् यन्नैवं तन्नैवमिति अनुमानात् तत्रापि वित्तोपाधिक एवाऽनुरागः । अत एव दशरूपके ऽप्युक्तम् ।

छन्नकामसुखार्थ्यज्ञस्वतन्त्राऽहंयुपण्डकान् ।
रक्तेव रञ्जयेत्सार्थान् निःस्वान्मात्रा विवासयेत् ॥ इति ।

यद्वीदानीन्तना अपि काश्चित्सामान्यवनिताः केषांचित्सौंदर्यादिगुणलोभात् स्वीयधनैरेवोपकुर्वन्तीति प्रत्यक्षविरुद्धेयं कल्पनेति विभाव्यते तदोक्तरीत्या सामान्यवनितात्वस्योपाधेः कालिकाव्याप्यवृत्तित्वमेव । प्रथमतः सामान्यवनितायां विना धनेनाऽनुरागश्चिरपरिचयोत्तरं तु सौन्दर्यादिना ऽनुराग इति तदवस्थायां नास्त्येव सामान्यवनितात्वम् । ननु तदा तासां काऽन्तर्भाव इति चेत् परकीयायामिति गृहाण । न चाऽप्रकटपरपुरुषाऽभिलाषेति लक्षणव्याघातापत्तिः । परकीयाया अपि न सर्वान् प्रत्यप्रकटपरपुरु-

दृष्ट्वेति । अभ्यागतं न त्वाकारितम् । तेन स्वतःप्रवृत्ततया बहुधनदातृत्वं तेन हर्षाऽतिशयः । दृष्ट्वेति । न तु स्पृष्ट्वेति । तेन दर्शनमात्रेण तादृशाऽवस्थेति धनलुब्धत्वम् । वक्षोजत्वेनान्तरङ्गता तेन स्वनायिकासुखसाधनसमयमेव हर्षयोग्यता । अन्योन्यमिति समानहर्षता । आश्लेषमालिङ्गनम् । हारादिप्राप्तिसम्भावनयेति । तनुत इत्य-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनन्दाऽश्रुपयांसि मुञ्चति मुहुर्मालामिषात्कुन्तलो
दृष्टिः किं च धनागमं कथयितुं कर्णान्तिकं गच्छति॥ ३२॥

षाभिलाषो यथा तथा ऽत्रापीति दिक् । के चित्तु सकलपदं बाहुल्याऽभिप्रायं बाहुल्येन वित्तमात्रोपाधिकाऽनुरागवत्त्वमिति लक्षणमाहुस्तन्न । अननुगमात् ।

सामान्यवनितामुदाहरति दृष्ट्वेति । का चित्कां चित्प्रत्याह प्राङ्गणसन्निधौ प्रकृष्टमङ्गणं प्राङ्गणम् । प्रकर्षश्च सुभगजनसरणिसन्निहितत्वं दूरतोपि दृश्यकामुकत्वं वा । तत्सन्निधौ चत्वरनिकटे । अङ्गणं चत्वराऽजिरे इत्यमरः । सन्निधिपदं दूरत एव दर्शनेनैतादृशाऽवस्थोत्पत्त्या धनलुब्धत्वमावेदयति । बहुधनं बहुद्रव्यवन्तं दातृत्वाऽभावे बहुधनवत्त्वमप्रयोजकमित्यत आह दातारं दानशीलमित्यर्थः । अभ्यागतमनाकारितमिति भावः । स्वतःप्रवृत्तत्वेनाऽधिकधनदातृत्वं द्योत्यते । तेन च हर्षाऽतिशयः । दृष्ट्वा विलोक्य न तु स्पृष्ट्वा । एवमपि दर्शनमात्रादेव एतादृश्यवस्थेति धनलुब्धत्वं द्योत्यते । कुरङ्गीदृशः मृगनेत्रायाः । मृगे कुरङ्गवातायु इत्यमरः । कुरङ्गपदं विशालत्वचपलते द्योतयति । वक्षोजौ कुचौ । वक्षोजपदमन्तरङ्गतां गमयति । सा च स्वनायिकासुखसाधनसमयहर्षयोग्यताम् । पर-

नेन चिरकालस्थायित्वं तेन हर्षातिशयः । कुन्तलपदेन कामिमनोजेतृत्वं मालेत्यनेन क्रमिकत्वं पयांसीत्यनेन कामिहृदयमदनानलोपशमशीलता चिरकालेन ममापि भूषणलाभो भविष्यतीति आनन्दाश्रु नायिकागतश्च हर्षजन्यातिशयसंभ्रमो व्यज्यते । अत्र दर्शनानन्देन गात्रस्फुरणे सहसैव स्तनसंपर्के आश्लेषोत्प्रेक्षा स्वाऽभिलाषप्रकटनाय शिरसि चेलाञ्चलदानेन करादिसंपर्केणाऽङ्गयष्टिकम्पेन बाष्पच्युतिः । कर्णविश्रान्तनेत्रकटाक्षविलोकनेन गमनोत्प्रेक्षेत्याहुः॥३२॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्परमन्योन्यम् । परस्परपदं समानहर्षतामावेदयति । आश्लेषमालिङ्गनमिव । हाराद्विमाप्तिसम्भावनयेति भावः । आश्लेषपदं हर्षविशेषं व्यञ्जयति । तनुत इव विस्तारयत इव । तनुत इत्यनेनाऽऽश्लेषे चिरकालाऽवस्थायित्वं ध्वन्यते । तेन च हर्षाऽतिशयः । कुन्तलाः कचाः सन्त्यस्मिन् संयतत्वेन स कुन्तल इति अर्शआदिभ्यो ऽच् । चिकुरः कुन्तलो बाल इत्यमरः । धम्मिल्लोपि । कुन्तलपदं कामिमनोजयकारणत्वं व्यनक्ति । मालामिषाद् पुष्पस्रग्व्याजाद् । मालापदं कामितां द्योतयति । आनन्दाश्रुपयांसि आनन्दो हर्षः शिरोभूषालिप्सयेति भावः । तेनाऽश्रुपयांसि अश्रुबिन्दूनि च । पयःपदं कामिहृदयमदनाऽनलोपशमनशीलतामावेदयति । मुञ्चति विसृजति । किं च अन्यच्च । दृष्टिः दृष्टिपदं धनदातृत्वाऽदातृत्वविवेकित्वं ध्वनयति । एकवचनं चैकरूपतया सत्यकथकत्वम् । धनागमं धनप्राप्तिम् । धनपदेन नानाविधत्वं ध्वन्यते । कथयितुं ख्यापयितुम् । तुमुना स्वतःप्रवृत्तत्वं व्यज्यते । तेन चाऽन्तरङ्गत्वं समीचीनत्वं च । कर्णान्तिकमिति पाठेपि तदेव व्यङ्ग्यम् । गच्छतीव । अत्र तद्दर्शनाऽऽनन्देन गात्रस्फुरणे सहसैव स्तनसंपर्के आश्लेषोत्प्रेक्षा । स्वाऽभिलाषप्रकटनाय शिरसि चैलाऽञ्चलदाने करादिसम्पर्केणाङ्गयष्टिकम्पः । श्रोत्राऽन्तिकं श्रोत्रनिकटम् । श्रोत्रपदेन रहस्यकथनयोग्यता ध्वन्यते । कम्पेन बाष्पच्युतौ आनन्दाऽश्रुत्यागोत्प्रेक्षा कर्णविश्रान्तनेत्रकटाक्षविलोकने गमनोत्प्रेक्षा । एवं लुप्ताऽलुप्तयोरुत्प्रेक्षयोः संसृष्टिः । उक्तं च । 'सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्' इति । सा च बहुधनदातृत्वस्येतरार्थं प्रति हेतुत्वाद्वाक्यार्थहेतुककाव्यलिङ्गाऽनुसंहिता । शार्दूलविक्रीडितं वृत्तम् ॥३२॥

इति श्रीव्यङ्ग्यार्थकौमुद्यां स्वीयापरकीयासामान्यनिरूपणम् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Siddhanta eGangotri Foundation Chennai and eGangotri

एता अन्यसम्भोगदुःखिता वक्रोक्तिगर्व्विता मानवत्यश्चेति तिस्रो भवन्ति।

तत्राऽन्यसम्भोगदुःखिता यथा।

त्वं दूति निरगाः कुञ्जं न तु पापीयसो गृहम्।
किंशुकाऽऽभरणं देहे दृश्यते कथमन्यथा॥ ३३॥

एवं तिस्रो नायिका निरूप्य तासामेव भेदान्तरमाह। एता इत्यादि। मुग्धादिभेदहीनस्वीयापरकीयासामान्या इत्यर्थः। अन्यसम्भोगदुःखिता। अन्यस्याः परस्याः सम्भोगः स्वनायकेन सह रतिप्रसङ्गस्तेन दुःखिता इत्यर्थः। स्वनायकीयनायिकान्तरसम्भोगज्ञानजन्यदुःखवत्त्वमिति तल्लक्षणं फलितम्। वक्रोक्तिगर्विता इति। वक्रोक्त्या उक्तिविशेषेण गर्विता स्वगर्वप्रदर्शनकारिणी। उक्तिविशेषप्रकटितस्वगर्वत्वमिति फलितम्। मानलक्षणमग्रे वक्ष्यते।

एता इति। स्वीयापरकीयासामान्या इत्यर्थः। अन्यस्याः सम्भोगे स्वनायकेन दुःखिता इत्यर्थः। तेन स्वनायकीयनायिकान्तरसम्भोगज्ञानजन्यदुःखवत्त्वं तल्लक्षणम्। वक्रोक्तिगर्विता। वक्रोक्तिव्यङ्ग्यगर्ववतीत्यर्थः। गर्वश्च प्रेमविषयकः सौन्दर्यविषयो वा। उक्तिविशेषप्रकटितस्वगर्वत्वं लक्षणम्।

नायकानयनाय प्रेषितां तेनोपभुक्तां दूतीमाह दूतीति। अनेनाऽसत्यभाषणयोग्यत्वं स्ववेदनाऽनभिज्ञत्वं स्वकार्यकरणप्रवणत्वं व्यनक्ति। कुञ्जमित्यनेन विविधमदनोद्दीपनशीलत्वम्। पापीयसो निर्दयस्याऽधमदूतीसम्भोगकर्तुश्च। किंशुकः पलाशकुसुमं तदाकारं नखक्षतञ्च।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमोद्दिष्टत्वादन्यसम्भोगदुःखितामुदाहरति त्वं दूतीति । का चिन्नायिका स्वयमेव नायकाऽऽकारणाय प्रेषितां तेनोपभुक्तां दूतीं प्रति वर्दति । हे दूति दूतीपदमसत्यभाषित्वमावेदयति । अन्यदीयवेदनाऽनभिज्ञत्वं स्वकार्यकरणप्रवणत्वं वा । त्वं कुञ्जं लतापिहितप्रदेशम् । अनादिष्टमिति भावः । कुञ्जपदं विविधोद्दीपनविभाववत्तया मदनबाधाजनकतां व्यञ्जयति । निरगाः गतवती । निरगा इत्यनेन गमने बुद्धिपूर्वकता व्यज्यते । गातिस्थेति सिचो लुक् । परं पापीयसो निर्दयस्य पापीयःपदं दूतीसङ्गतियोग्यतामावेदयति । एकवचनमनादरं व्यञ्जयति । गृहं सदनम् । आदिष्टमिति भावः । गृहपदं गमनयोग्यतां ध्वनयति । द्वितीया स्पृहणीयतां व्यनक्ति । न निरगाः । प्रमाणसिद्धार्थप्रतिपादकं मद्वाक्यं नाऽलीकमित्याह अन्यथेति । उक्तवैपरीत्ये तवेति शेषः । तवेति पदाऽनुपादानेन स्वतन्त्रता ध्वन्यते । तथा च स्वतन्त्रस्य किमकार्यमिति द्योत्यते । तेन च स्वनायकसङ्गमशालित्वम् । देहे अङ्गे । देहपदं सन्तोषपात्रतां व्यञ्जयति । किंशुकाभरणं किंशुकानां पलाशपुष्पाणामाभरणं मालेति यावत् । यद्वा तान्येवाऽऽभरणमलङ्कारः इतराऽलङ्करणसत्त्वे तत्त्वतो न वेद्मि कारणम् । किंशुकाभरणं तु स्फुटं प्रत्येमीत्यर्थः । एवं च स्फुटपरिदृश्यमानकिंशुकाभरणवत्तया कुञ्जगमनाऽनुमानात् मया त्वदीयकुञ्जगमनं तत्त्वतो ऽत्रमितमतो नाऽहं प्रतारणीयेति भावः किंशुकपदेनाऽऽरक्तत्वं कुटिलत्वं च व्यज्यते । आभरणपदं सुखजनकतां व्यनक्ति । एकवचनं

न चेयं खण्डितैवेति वाच्यम् । प्रियाऽङ्गसङ्गिकामिन्यन्तरलक्ष्मदर्शनसञ्जातखेदा खण्डिता स्वप्रियसम्भोगलक्ष्मवत्कामिनीदर्शनसञ्जातखेदेयमिति भेदात् ॥ ३३ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Siddhanta eGangotri

दुर्लभतां ध्वनयति। कथं दृश्यते। यद्वा दूति दूयते परितप्यते सा दूती तदामन्त्रणे हे दूति मत्खेदखिन्ना त्वं तापोपशामकं कुञ्जं गतवती मत्प्रियतमविरहदुःखेन दुःखितमात्मानं तदुपनायकवस्तुलाभेन सुखयन्ती मामपि तथाविधां स्वाऽभिन्नताऽभिमानेन सम्भावयन्ती कुञ्जं जनसंवासरहितप्रदेशविशेषं गतवती। परं तु पापीयसो मद्दुःखदस्य मदर्थमनेकचाटुवचनरचनाकारिणः तत्स्वामिकत्वात्तथाविधं तद्गृहं अहङ्कारेणैव न गतवती। तथा च साधु इदं चेष्टितं कृतम्। एतेनाऽहमतीव सुखिता ऽस्मीत्याकूतविशेषो व्यज्यते। प्रबलतरयत्नेन कुसुमशरस्य अरुन्तुदा अतितप्ता इव रक्ता इमे शराः अपहृत्य समानीता अतो न ते कापि कुसुमसायकवेदना भविष्यतीति मत्समाधानविधानायैव स्फुटं ध्रियमाणान्याभरणरूपाणि किंशुकानि दृश्यन्तइत्यर्थः। तथा च सर्वं मत्प्रियं त्वया सम्पादितमतस्त्वत्समानामन्यां सहचरीं न पश्यामीत्युपहासो व्यज्यते। अत्र "व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथे"ति लक्षणलक्षितव्याजस्तुतिः वक्रोक्त्यपह्नुतिसंसृष्टा। अनुमानं तु तत्कार्यकारणाद्यवधारणमिति लक्षणलक्षितकिंशुकलिङ्गककुञ्जगमनाऽनुमानरूपालङ्कारेण प्रियमुक्तदूतीनखक्षतादिसम्भोगलक्ष्मदर्शनेन नायिकाया दुःखागमप्रतीतिरूपं वस्तु ध्वन्यते। तेन च प्रियदूत्योरपराधप्रकाशनरूपं वस्तु व्यज्यते। ननु खण्डितत्वेयमिति ततो ऽन्यसम्भोगदुःखिता ऽन्येति चेत्सत्यम्। प्रियाऽङ्गसङ्गिकामिन्यन्तरलक्ष्मदर्शनसञ्जातखेदवती खण्डिता, स्वप्रियसम्भोगलक्ष्मवत्कामिनीदर्शनसञ्जातदुःखवती अन्यसम्भोगदुःखितेति तदियमेवाऽवस्थाभेदाद्भिन्ना। अत एव अन्योपभोगचिन्हितपतिदर्शनस-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वक्रोक्तिगर्विता द्विविधा, प्रेमगर्विता सौन्दर्यगर्विता च।

तत्र प्रेमगर्विता यथा।

वपुषि तव तनोति रत्नभूषां
प्रभुरिति धन्यतमा ऽसि किं ब्रवीमि।

ऽजातदुःखात्वमेव खण्डितालक्षणं वक्ष्यति ग्रन्थकृत्। इदं च स्वीयादित्रितयसाधारणमुदाहरणम्। एवमग्रेपि बोध्यम्। पथ्यावक्त्रं वृत्तम्॥ ३३॥

उद्दिष्टक्रमाद्वक्रोक्तिगर्विताविभागमाह प्रेमेत्यादि। प्रियतमनिरूपितस्वगतप्रीत्यतिशयगर्वव्यञ्जकवक्रोक्तिरचनानिपुणत्वं प्रेमगर्वितात्वम्। तथा स्वगतसौन्दर्योत्कर्षगर्वप्रयुक्तवक्रोक्तिरचनानिपुणत्वं सौदर्यगर्वितात्वम्।

तत्र प्रथमोद्दिष्टत्वात् प्रथमामुदाहरति वपुषीति। काचित् भङ्ग्यन्तरेण स्वगतप्रियतमप्रीत्यतिशयमाविष्कर्तुं सखीं प्रत्याह हे सखि प्रभुर्भता। प्रभुपदं समर्थतां व्यञ्जयति। सा च यथा बहुलतया ऽलङ्करणादिकं गेहे स्थापनीयं तथा तव देहे स्थापितमतो न तोषातिशय इति प्रियतमाऽनादरं ध्वनयति। यद्वा प्रभुपदं स्वतन्त्रत्वं व्यनक्ति तदपि दुराराध्यत्वं कार्यकालीनप्रेमकारित्वं वा। तत्र वपुषि अङ्गे रत्नभूषां रत्न-

वपुषीति। तनुः शरीरम्। नयने च तयोरन्तरालं व्यवधानम् तेन भीरुः। तव प्रभुर्न प्रियः। तव वपुषि रत्नभूषां तनोति यद्धि स्वतो न शोभते तस्यैव भूषा युक्ता न त्वन्यस्येति भावः। अत एववपुषीत्युक्तम्। त्वं धन्यतमासि आपाततो ऽहमधन्येति वक्रोक्त्या ऽहमेव धन्या त्वमधन्यैवेति व्यतिरेको व्यज्यते॥ ३४॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूचीपत्रम् ।

गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली	०	२	०
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	४	०
भट्टीकाव्य ५ सर्ग	०	६	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
वार्तिकपाठः	०	४	०
विष्णुसहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	४	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	०	०

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विज्ञापनम् ।

—:०:—

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ।।।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ३	३	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ३	३	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यं	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम्	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्)	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्टीका खण्डानि ४	४	०
पातञ्जलदर्शनम् श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	०
व्याकरणमिताक्षरा । सर्वतन्त्रस्वतन्त्रश्रीमदन्नंभट्टप्रणीता ख० ३	३	०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता	१	०
न्यायलीलावती (यन्त्रस्था)	०	

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.